## कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

### हस्तलिखित स्रोत केंद्र, रामटेक

M417

| | |
|---|---|
| शीर्षक : – | विवेकचुडामणी |
| ग्रंथकार /लिपिक :– | माधव (लिपीक) |
| पृष्ठे :– | 48 |
| काळ :– | इ.स. 1867 |
| विषय :– | दर्शन |
| स्वरूपः– | संपूर्ण |
| लिपी :– | देवनागरी/नंदिनागरी/मोडी/तेलुगु/शारदा/नेवारी/ग्रंथ |

# अथविवेकचूडामणिः प्रारंभः

— श्री· भाऊ शास्त्री केळवदकर स्येदं पुस्तकम्· —

श्रीगणेशाय नमः ॥ श्रीमत्सद्गुरवे नमः ॥ सर्ववेदांतसिद्धांतगोचरं तम
गोचरं ॥ गोविंदं परमानंदं सद्गुरुं प्रणतोस्म्यहं ॥१॥ जंतूनां नरजन्म दुर्लभ
मतः पुंस्त्वं ततो विप्रता तस्माद्वैदिकधर्ममार्गपरता विद्वत्त्वमस्मात्परं ॥ आ
त्मानात्मविवेचनं स्वनुभवो ब्रह्मात्मना संस्थितिर्मुक्तिर्नो शतजन्मकोटिसु
कृतैः पुण्यैर्विना लभ्यते ॥२॥ दुर्लभं त्रयमेवैतद्देवानुग्रहहेतुकं ॥ मनुष्यत्वं
मुमुक्षुत्वं महापुरुषसंश्रयः ॥३॥ लब्ध्वा कथंचिन्नरजन्म दुर्लभं तत्रापि पुं
स्त्वं श्रुतपारदर्शनं ॥ यस्त्वात्ममुक्त्यै न यतेत मूढधीः स आत्महा स्वं विनिहं
त्यसद्ग्रहात् ॥४॥ इतः कोन्वस्ति मूढात्मा यस्तु स्वार्थे प्रमाद्यति ॥ दुर्लभं
मानुषं देहं प्राप्य तत्रापि पौरुषं ॥५॥ वदंतु शास्त्राणि यजंतु देवान्कुर्वंतु १

ब्रह्म

कर्माणि भजंतु देवताः॥ आत्मैक्यबोधेन विना न मुक्तिर्न सिध्यति शतां
तरेपि॥६॥ अमृतस्य त्वे नाशास्ति वित्तेनेत्येव हि श्रुतिः॥ ब्रवीति कर्मणो मुक्ते
रहेतुत्वं स्फुटं यतः॥७॥ अतो विमुक्त्यै प्रयतेत विद्वान्संन्यस्त बाह्या
र्थसुखस्पृहः सन्॥ संतं महांतं समुपेत्य देशिकं तेनोपदिष्टार्थसमाहिता
त्मा॥८॥ उद्धरेदात्मनात्मानं मग्नं संसारवारिधौ॥ योगारूढत्वमासाद्य
सम्यग्दर्शननिष्ठया॥९॥ संन्यस्य सर्वकर्माणि भवबंधविमुक्तये॥ यत्य
स तां पंडितैर्धीरैरात्माभ्यासमुपस्थितैः॥१०॥ चित्तस्य शुद्धये कर्म न तु वस्तूप
लब्धये॥ वस्तुसिद्धिर्विचारेण न किंचित्कर्मकोटिभिः॥११॥ सम्यग्विचार
तः सिद्धा रज्जुतत्त्वावधारणा॥ भ्रांत्योदितसर्पमहाभयदुःखविनाशिनी॥१२

वि॰ चू॰
२

अर्थस्यनिश्चयोदृष्टोविचारेणहितोक्तिभिः॥नस्नानेननदानेनप्रणाया
मशतेनवा॥१३॥अधिकारिणमाशास्तेफलसिद्धिर्विशेषतः॥उपायादेश
कालाद्याःसंत्यस्मिन्सहकारिणः॥१४॥अतोविचारःकर्त्तव्योजिज्ञासो
रात्मवस्तुनः॥समासाद्यदयासिंधुंगुरुंब्रह्मविदुत्तमं॥१५॥मेधावीपुरुषो
विद्वानूहापोहविचक्षणः॥अधिकार्यात्मविद्यायामुक्तलक्षणलक्षितः॥१६
विवेकिनोविरक्तस्यशमादिगुणशालिनः॥मुमुक्षोरेवहिब्रह्मजिज्ञासा
योग्यतामता॥१७॥साधनान्यत्रचत्वारिकथितानिमनीषिभिः॥येषुसत्स्वे
वसन्निष्ठायदभावेनासिध्यति॥१८॥आदौनित्यानित्यवस्तुविवेकःप
[illegible]रिगण्यते॥इहामुत्रफलभोगविरागस्तदनंतरं॥१९॥शमादि

२

षट्कसंपात्तिर्मुमुक्षुत्वमितिस्फुटं॥ ब्रह्मसत्यंजगन्मिथ्येत्येवंरूपोविनि
श्चयः॥२०॥ सोयंनित्यानित्यवस्तुविवेकःसमुदाहृतः॥ तद्वैराग्यंजुगुप्साया
दर्शनश्रवणादिभिः॥२१॥ देहादिब्रह्मपर्यंतेह्यनित्येभोग्यवस्तुनि॥ विर
ज्यविषयव्राताद्दोषदृष्ट्यामुहुर्मुहुः॥२२॥ स्वलक्ष्येनियतावस्थामन
सः शमउच्यते॥ विषयेभ्यःपरावर्त्यस्थापनंस्वस्वगोलके॥२३॥ उभये
षामिंद्रियाणांसदमःपरिकीर्तितः॥ बाह्यानालंबनंवृत्तेरेषोपरतिरुत्तमा
॥२४॥ सहनंसर्वदुःखानामप्रतीकारपूर्वकं॥ चिंताविलापरहितंसातिति
क्षानिगद्यते॥२५॥ शास्त्रस्यगुरुवाक्यस्यसत्यबुध्यवधारणं॥ साश्र
द्धाकथितासद्भिर्ययावस्तूपलभ्यते॥२६॥ सर्वदास्थापनंबुद्धेःशुद्धेब्रह्मणि

वि०चू० ८

सर्वदा॥ तत्समाधानमित्युक्तं नतु चित्तस्य लालनं॥२७॥अहंकारादि
देहांतान्बंधानज्ञानकल्पितान्॥ स्वस्वरूपावबोधेन मोक्तुमिच्छा मुमु
क्षुता॥२८॥ मंदमध्यमरूपापि वैराग्येण शमादिना॥ प्रसादेनगुरोः सेयं
प्रवृद्धा सूयते फलं॥२९॥ वैराग्यं च मुमुक्षुत्वं तीव्रं यस्यैव विद्यते॥ तस्मिन्ने गु
वार्थवंतः स्युः फलवंतः शमादयः॥३०॥ एतयोर्मंदता यत्र विरक्तत्वमुमु
क्षयोः॥ मरौसलिलवत्तत्र शमादेर्भानमात्रता॥३१॥ मोक्षकारणसाम
ग्र्यां भक्तिरेव गरीयसी॥ स्वस्वरूपानुसंधानं भक्तिरित्यभिधीयते॥३२
स्वात्मतत्त्वानुसंधानं भक्तिरित्यपरे जगुः॥ उक्तसाधनसंपन्नस्तत्त्वजिज्ञा ३
सुरात्मनः॥३३॥ उपसीदेद्गुरुं प्राज्ञं यस्माद्बंधविमोक्षणं॥ श्रोत्रियोऽवृजि

तो॰

नोकामहतो यो ब्रह्मविन्तमः ॥३४॥ ब्रह्मण्युपरतः शांतो निरिंधन इवानलः ॥ अहेतु
कदयासिंधुर्बंधुरानमतां सतां ॥३५॥ तमाराध्य गुरुं भक्त्या प्रव्हप्रश्रयसेवनैः ॥ प्र
सिन्नं तमनुप्राप्य पृच्छेज्ज्ञातव्यमात्मनः ॥३६॥ स्वामिन्नमस्ते नतलोकबंधो कारुण्य
सिंधो पतितं भवाब्धौ ॥ मामुद्धरात्मीयकटाक्षदृष्ट्या ऋज्व्यातिकारुण्यसुधाभिवृ
ष्ट्या ॥३७॥ दुर्वारसंसारदवाग्नितप्तं दोधूयमानं दुरदृष्टवातैः ॥ भीतं प्रपन्नं परिपा
हि मृत्योः शरण्यमन्यं यदहं न जाने ॥३८॥ शांता महांतो निवसंति संतो वसंतल्लोक व
हितं चरंतः ॥ तीर्णाः स्वयं भीममहार्णवं जनानहेतुनान्यानपि तारयंतः ॥३९॥
अयं स्वभावः स्वत एव यत्पर श्रमापनोदप्रवणं महात्मनां ॥ सुधांशुरेष स्वयम
र्ककर्कशप्रभाभितप्तामवति क्षितिं किल ॥४०॥ ब्रह्मानंदरसानुभूतिकलितैः पूतैः

वि० चू०
५

सुशीतैर्युतैर्युष्मद्वाक्कलशोज्झितैः श्रुतिसुखैर्वाक्यामृतैः सेचय॥ संतप्तंभवताप
दावदहनज्वालाभिरेनंप्रभोधन्यास्तेभवदीक्षणक्षणगतेः पात्रीकृताः स्वीकृताः॥४१॥
कथंतरेयंभवसिंधुमेतंकावागतिर्मेकतमोस्त्युपायः॥ जानेनकिंचित्कृपयावमांप्र
भोसंसारदुःखक्षतिमातनुष्व॥४२॥ तथावदंतंशरणागतंस्वंसंसारदावानलताप
तप्तं॥ निरीक्ष्यकारुण्यदयार्द्रदृष्ट्या दद्यादभीतिंसहसामहात्मा॥४३॥ विद्वान्सत
स्माउपसत्तिमीयुषेमुमुक्षवेसाधुयथोक्तकारिणे॥ प्रशांतचित्तायशमान्वितायत
त्त्वोपदेशंकृपयैवकुर्यात्॥४४॥ माभैष्टविद्वंस्तवनास्त्यपायः संसारसिंधोस्तरणेस्त्यु
पायः॥ येनैवयातायतयोस्यपारंतमेवमार्गंतवनिर्दिशामि॥४५॥ अस्त्युपायो
महान्कश्चित्संसारभयनाशनः॥ तेनतीर्त्वाभवांभोधिंपरमानंदमेप्स्यसि॥४६॥ ५

वेदांतार्थविचारेण जायते ज्ञानमुत्तमं ॥ तेनात्यंतिकसंसारदुःखनाशो भवत्य
नु ॥ ४७ ॥ श्रद्धाभक्तिध्यानयोगान्मुमुक्षोर्मुक्तेर्हेतून्वक्ति साक्षाछ्रुतेर्गीः ॥ यो
वा एतेष्वेव तिष्ठत्यमुष्य मोक्षोऽविद्याकल्पिताद्देहबंधात् ॥ ४८ ॥ अज्ञानयोगा
त्परमात्मनस्तव ह्यनात्मबंधस्तत एव संसृतिः ॥ तयोर्विवेकोदितबोधवह्नि
रज्ञानकार्यं प्रदहेत्समूलं ॥ ४९ ॥ शिष्यः ॥ कृपया श्रूयतां स्वामिन्प्रश्नोयं क्रियते
मया ॥ यदुत्तरमहं श्रुत्वा कृतार्थः स्यां भवन्मुखात् ॥ ५० ॥ को नाम बंधः कथमेष
आगतः कथं प्रतिष्ठास्य कथं विमोक्षः ॥ कोसावनात्मा परमः क आत्मा तयोर्वि
वेकः कथमेतदुच्यतां ॥ ५१ ॥ गुरुः ॥ धन्योसि कृतकृत्योसि पावितं ते कुलं त्वया ॥
यदविद्याबंधमुक्त्या ब्रह्मीभवितुमिछसि ॥ ५२ ॥ ऋणमोचनकर्त्तारः पितुः संति

वि॰चू॰
५

सुतादयः ॥ बंधमोचनकर्त्ता तु स्वस्मादन्यो न कश्चन ॥ ५३ ॥ मस्तकन्यस्त
भारादेर्दुःखमन्यैर्निवार्यते ॥ क्षुधादिकृतदुःखं तु विना स्वेन न केनचित् ॥ ५४
ये पथ्यमौषधसेवा च क्रियतेँ न रोगिणा ॥ आरोग्यसिद्धिर्दृष्टाँ नानुन्यष्ठितकर्म स्य
णा ॥ ५५ ॥ वस्तुस्वरूपं स्फुटबोधचक्षुषा स्वेनैव वेद्यं न तु पंडितेन ॥ चंद्रस्वरूपं
निजचक्षुषैव ज्ञातव्यमन्यैरवगम्यते किं ॥ ५६ ॥ अविद्याकामकर्मादिपाश
बंधं विमोचितुं ॥ कः शक्नुयाद्विनात्मानं कल्पकोटिशतैरपि ॥ ५७ ॥ न योगेन न सां
ख्येन कर्मणा नो न विद्यया ॥ ब्रह्मात्मैकत्वबोधेन मोक्षः सिध्यति नान्यथा ॥ ५८
वीणाया रूपसौंदर्यं तंत्रीवादनसौष्ठवं ॥ प्रजारंजनमात्रं तन्न साम्राज्याय
कल्पते ॥ ५९ ॥ वाग्वैखरी शब्दझरी शास्त्रव्याख्यानकौशलं ॥ वैदुष्यं विदुषां ५

तद्वद्भुक्तये नमुक्ते तुक्तये ॥६०॥ अविज्ञाते परे तत्वे शास्त्राधीतिस्तु निष्फला ॥
विज्ञातेपि परे तत्वे शास्त्राधीतिस्तु निष्फला ॥६१॥ शब्दजालं महारण्यं चित्त
भ्रमणकारणं ॥ अतः प्रयत्नाज्ज्ञातव्यं तत्वज्ञैस्तत्वमात्मनः ॥६२॥ अज्ञानस
र्पदष्टस्य ब्रह्मज्ञानौषधं विना ॥ किमु वेदैश्च शास्त्रैश्च किमु मंत्रैः किमौषधैः ॥
६३॥ न गच्छति विना पानं व्याधिरौषधशब्दतः ॥ विनाऽपरोक्षानुभवं ब्रह्मश
ब्दैर्न मुच्यते ॥६४॥ अकृत्वा शत्रुसंहारमगत्वाखिलभूश्रियं ॥ राजाहमिति
शब्दान्नो राजा भवितुमर्हति ॥६५॥ अकृत्वा दृश्यविलयमज्ञात्वा तत्वमात्म
नः ॥ बाह्यशब्दैः कुतो मुक्तिरुक्तिमात्रफलैर्नृणां ॥६५॥ आप्तोक्तिं खननं त
थोपरिशिलाद्युत्कर्षणं स्वीकृतं निक्षेपः समपेक्षते नहि बहिःशब्दैस्तु निर्गच्छ

वि० चू०
६

भि
ति ॥ तद्वद्ब्रह्मविदोपदेशमननध्यानादिर्लभ्यते मायाकार्यतिरोहितं स्वम
मलं तत्त्वं विदुर्युक्तिभिः ॥ ६७ ॥ तस्मात्सर्वप्रयत्नेन भवबंधविमुक्तये ॥ स्वैरेव य
त्नः कर्त्तव्यो रोगादाविव पंडितैः ॥ ६८ ॥ यस्त्वयाद्य कृतः प्रश्नो वरीयांश्छास्त्र
संमतः ॥ सूत्रप्रायो निगूढार्थो ज्ञातव्यश्च मुमुक्षुभिः ॥ ६९ ॥ शृणुष्वावहितो ब्र
ह्मन्यन्मया समुदीर्यते ॥ तदेतछ्रवणात्सद्यो भवबंधाद्विमोक्ष्यसे ॥ ७० ॥ मो
क्षस्य हेतुः प्रथमो निगद्यते वैराग्यमत्यंतमनित्यवस्तुषु ॥ ततः शमश्चापि दम
स्तितिक्षान्यासः प्रशस्ताखिलकर्मणां भृशं ॥ ७१ ॥ ततः श्रुतिस्तन्मननं सतत्त्व
ध्यानं चिरं नित्यनिरंतरं मुनेः ॥ ततो विकल्पं परमेत्य विद्वानिहैव निर्वाण
सुखं समृच्छति ॥ ७२ ॥ यद्बोद्धव्यं तवेदानीमात्मानात्मविवेचनं ॥ तदुच्यते ६

मयासम्यक्छ्रुत्वात्मन्यवधारय ॥ ७३ ॥ मज्जास्थिमेदःपलरक्तचर्मत्वगाह्वयै
र्धातुभिरेभिरन्वितं ॥ पादोरुवक्षोभुजपृष्ठमस्तकैरंगैरुपांगैरुपयुक्तमेतत् ॥
७४ ॥ अहंममेतिप्रथितंशरीरंमोहास्पदंस्थूलमितीर्यतेबुधैः ॥ नभोनभस्वद्द
भूतानि हनांबुभूमयःसूक्ष्माणिभवंतितानि ॥ ७५ ॥ परस्परांशैर्मिलितानिभूत्वा स्थू
लानिचस्थूलशरीरहेतवः ॥ मात्रास्तदीयाविषयाभवंतिशब्दादयःपंचसुखा
यभोक्तुः ॥ ७६ ॥ यएषुमूढाविषयेषुबद्धारागोरुपाशेनसुदुर्मदेन ॥ आयां
तिनिर्यांत्यधऊर्ध्वमुच्चैःस्वकर्मदूतेनजवेननीताः ॥ ७७ ॥ शब्दादिभिःपंच
भिरेवपंचपंचत्वमापुःस्वगुणेनबद्धाः ॥ कुरंगमातंगपतंगमीनभृंगान
रःपंचभिरंचितःकिं ॥ ७८ ॥ दोषेणतीव्रोविषयःकृष्णसर्पविषादपि ॥ विषंनि

हंतिभोक्तारं द्रष्टारं चस्रुषाप्ययं ॥७९॥ विषयाशामहापाशाद्योविमुक्तः सु
दुस्त्यजात् ॥ सएव कल्पते मुक्त्यै नान्यः षट्शास्त्रवेद्यपि ॥८०॥ आपातवैराग्य
वतोमुमुक्षून् भवाब्धिपारं प्रतियातुमुद्यतः ॥ आशाग्रहो मज्जयतेंतरालेनि
गृह्यकंठे विनिवर्त्य वेगात् ॥८१॥ विषयाख्यग्रहोयेन सुविरक्त्यसिनाहतः ॥ स
गच्छति भवांभोधेः पारं प्रत्यूहवर्जितः ॥८२॥ विषमविषयमार्गैर्गच्छतोनच्छबु
द्धेः प्रतिपदमभिघातो मृत्युरप्येषसिद्धः ॥ हितसुजनगुरूक्त्यागच्छतः स्वस्य
युक्त्याप्रभवतिफलसिद्धिः सत्यमित्येवविद्धि ॥८३॥ मोक्षस्य कांक्षायदिवैत
वास्तित्यजातिदूराद्विषयान्विषंयथा ॥ पीयूषवत्तोषदयाक्षमार्जवप्रशांति
दांतीर्भजनित्यमादरात् ॥ ८४॥ अनुक्षणं यत्परिहृत्यकृत्यमनाद्यविद्याकृत

बंधमोक्षणं ॥ देहः परार्थोऽयममुष्यपोषणे यः सज्जते स स्वमनेन हंति ॥ ८५
शरीरपोषणार्थी सन्य आत्मानं दिदृक्षति ॥ ग्राहं दारुधिया धृत्वा नदीं तर्तुं स
इच्छति ॥ ८६ ॥ मोह एव महामृत्युर्मुमुक्षोर्वपुरादिषु ॥ मोहो विनिर्जितो येन स मु
क्तिपदमर्हति ॥ ८७ ॥ मोहं जहि महामृत्युं देहदारसुतादिषु ॥ यं जित्वा मुनयो
यांति तद्विष्णोः परमं पदं ॥ ८८ ॥ त्वं मांसरुस्नायुधिरे मदोमज्जास्थिसंकु
लं ॥ पूर्णं मूत्रपुरीषाभ्यां स्थूलं निंद्यमिदं वपुः ॥ ८९ ॥ पंचीकृतेभ्यो भूतेभ्यः
स्थूलेभ्यः पूर्वकर्मणा ॥ समुत्पन्नमिदं स्थूलं भोगायतनमात्मनः ॥ ९० ॥ अ
वस्थाजागरस्तस्य स्थूलार्थानुभवो यतः ॥ ९१ ॥ बाह्येंद्रियैः स्थूलपदार्थसे
वां स्रक्चंदनस्त्र्यादिविचित्ररूपां ॥ करोति जीवः स्वयमेतदात्मना तस्मा

वि० चू० ८

त्र शक्तिर्वपुषोस्यजागरे॥९२॥ सर्वोपिबाह्यसंसारः पुरुषस्ययदाश्रयः॥
विद्धिदेहमिमंस्थूलंगृहवद्गृहमेधिनः॥९३॥ स्थूलस्यसंभवजरामरणानि
धर्माः स्थौल्यादयोबहुविधाःशिशुताद्यवस्थाः॥ वर्णाश्रमादिनियमाबहुधा
मयाःस्युःपूजावमानबहुमानमुखाविशेषाः॥९४॥ बुद्धींद्रियाणिश्रवणंत्व
गक्षिघ्राणंचजिंह्वाविषयावबोधनात्॥ वाक्पाणिपादागुदमप्युपस्थः क
र्मेंद्रियाणिप्रवणेनकर्मसु॥९५॥ निगद्यतेंतःकरणंमनोधीरहंकृतिश्चि
ति त्तमितिस्ववृत्तिभिः॥९६॥ मनस्तुसंकल्पविकल्पनादिभिर्बुद्धिःपदार्थाध्यव
सायधर्मतः॥ अत्राभिमानादहमित्यहंकृतिः स्वार्थानुसंधानगुणेनचित् ८
तं॥९७॥ प्राणापानव्यानोदानसमानाभवत्यसौप्राणः॥ स्वयमेववृत्तिभे

पंच

दाद्धिरूतिभेदात्कवर्णसलिलादिवत् ॥९८॥ वागादिपंचश्रवणादिपंचप्रा
पादिपंचाभ्रमुखानि ॥ बुध्याद्यविद्यापिचकामकर्मणीपुर्यष्टकं सूक्ष्मशरी
रमाहुः ॥९९॥ इदंशरीरंश्रुणुसूक्ष्मसंज्ञितंलिंगंत्वपंचीकृतभूतसंभवं ॥
सवासनंकर्मफलानुभावकं स्वाज्ञानतोनादिरुपाधिरात्मनः ॥१००॥ स्वप्नो
भवत्यस्यविभक्त्यवस्थास्वमात्रविशेषेणविभातियत्र ॥ स्वप्नेतुबुद्धिः स्वय
मेवजाग्रत्कालीननानाविधवासनाभिः ॥१॥ कर्त्रादिभावंप्रतिपद्यराजते
यत्रस्वयंभातिह्ययंपरात्मा ॥ धीमात्रकोपाधिरशेषसाक्षीनलिप्यतेतत्कृ
तकर्मलेशैः ॥ यस्मादसंगस्ततएवकर्मभिर्नलिप्यतेकिंचिदुपाधिकृतैः ॥
२॥ सर्वव्यावृतिकरणंलिंगमिदंस्याच्चिदात्मनःपुंसः ॥ वास्यादिकमिवतक्ष्ण

ना

विवे॰ चू॰
१

मा
स्तेनैवाभवत्यसंगोयं ॥३॥ अंधत्वमंदत्वपटुत्वधर्माः सौगुण्यवैगुण्यवशाद्धि
चक्षुषः ॥ बाधिर्यमूकत्वमुखास्तथैव श्रोत्रादिधर्मा न तु वेत्तुरात्मनः ॥४॥
उच्छ्वासनिःश्वासविजृंभणक्षुत्प्रस्पंदनाद्युत्क्रमणादिकाः क्रियाः ॥ प्राणादि
कर्माणि वदंति तज्ज्ञाः प्राणस्य धर्मावशनापिपासे ॥५॥ अंतःकरणमेतेषु चक्षु
रादिषु वर्ष्मणि ॥ अहमित्यभिमानेन तिष्ठत्याभसतेजसा ॥६॥ अहंकारः सवि
ज्ञेयः कर्ता भोक्ताभिमान्ययं ॥ सत्वादिगुणयोगेनावस्थात्रितयमश्नुते ॥७॥
विषयाणामानुकूल्ये सुखी दुःखी विपर्यये ॥ सुखं दुःखं च तद्धर्मौ सदानंदस्
स्य नात्मनः ॥८॥ आत्मार्थत्वेन हि प्रेयान्विषयो न स्वतः प्रियः ॥ स्वत एव हि सर्वे
षामात्मा प्रियतमो यतः ॥९॥ तत आत्मा सदानंदो नास्य दुःखं कदाचन ॥ यः

पा
१

स्फुसौ निर्विषय आत्मानंदोनुभूयते ॥१०॥ श्रुतिप्रत्यक्षमैतिह्यमनुमानं च जा
यति ॥११॥ अव्यक्तनाम्नी परमेशशक्तिरनाद्यविद्या त्रिगुणात्मिका परा ॥ का
र्यानुमेया सुधियैव माया यया जगत्सर्वमिदं प्रसूयते ॥१२॥ सन्नाप्यसन्नाप्यु
भयात्मिका नो भिन्नाप्यभिन्नाप्युभयात्मिका नो ॥ संगाप्यनंगाप्युभयात्मिका
नो महाद्भुतानिर्वचनीयरूपा ॥१३॥ शुद्धाद्वयब्रह्मविबोधनाश्या सर्पभ्रमो र
ज्जुविवेकतो यथा ॥ रजस्तमः सत्वमि ति प्रसिद्धा गुणास्तदीयाः प्रथितैः स
कार्यैः ॥१४॥ विक्षेपशक्ती रजसः क्रियात्मिका यतः प्रवृत्तिः प्रसृता पुराणी ॥
रागादयो स्याः प्रभवंति नित्यं दुःखादयो ये मनसो विकाराः ॥१५॥ कामक्रोधो
लोभदंभाभ्यसूयाहंकारेर्ष्यामत्सराद्यास्तु घोराः ॥ धर्मा एते राजसाः पुंप्रवृत्ति

वि॰ चू॰
१०

र्यस्मादेषा तद्रजो बंधहेतुः॥१६॥ एषावृतिर्नाम तमोगुणस्य शक्तिर्यया वस्त्व
वभासतेन्यथा॥ सैषा निदानं पुरुषस्य संसृतेर्विक्षेपशक्तेः प्रवणस्य हेतुः॥१७
प्रज्ञावानपि पंडितोपि चतुरोप्यत्यंतसूक्ष्मार्थदृग्व्यालीढस्तमसा न वेत्ति बहु
धा संबाधितोपि स्फुटं॥ भ्रांत्यारोपितमेव साधु कलयत्यालंबते तद्गुणान् हं
त तासौ प्रबला दुरंततमसः शक्तिर्महत्यावृतिः॥१८॥ अभावना वा विपरीतभा
ना संभावना विप्रतिपत्तिरस्याः॥ संसर्गयुक्तं न विमुंचति ध्रुवं विक्षेपशक्तिः
क्षपयत्यजस्रं॥१९॥ अज्ञानमालस्यजडत्वनिद्राप्रमादमूढत्वमुखास्तमोगु॰
णाः॥ एतैः प्रयुक्तो नहि वेत्ति किंचिन्निद्रालुवत्स्तंभवदेव तिष्ठति॥२०॥ सत्वं विशु
द्धं जलवत्तथापि ताभ्यां मिलित्वा सरणाय कल्पते॥ तत्रात्मबिंबः प्रतिबिंबितः सन्प्रका १०

शायत्यर्क इवाखिलं जडं ॥२१॥ मिश्रस्य सत्वस्य भवंति धर्मास्त्वमानिता द्या
नियमाद्यमाद्याः ॥ श्रद्धा च भक्तिश्च मुमुक्षुता च दैवी च संपत्तिरसन्निवृत्तिः ॥
२२॥ विशुद्धसत्वस्य गुणाः प्र साद: स्वात्मानुभूतिः परमा प्रशांतिः ॥ तृप्तिः प्रह
र्षः परमात्मनि स्थायया सदानंदरसं समृच्छति ॥२३॥ अव्यक्तमेतत्त्रिगुणैर्नि
रुक्तं तत्कारणं नाम शरीरमात्मनः ॥ सुषुप्तिरेतस्य विभक्त्यवस्था प्रलीन सर्वें
द्रियबुद्धिवृत्तिः ॥२४॥ सर्वप्रकारप्रमितिप्रशांतिर्बीजात्मनावस्थितिरेव बु
द्धेः ॥ सुषुप्तिरस्य किल प्रतीतिः किंचिन्न वेद्मीति जगत्प्रसिद्धेः ॥१२५॥ देहेंद्रि
यप्राणमनोहमादयः सर्वे विकारा विषयाः सुखादयः ॥ व्योमादिभूतान्य
च खिलं विश्वमव्यक्तपर्यंतमिदं ह्यनात्मा ॥२६॥ मायामायाकार्यं सर्वं महदादि

देहपर्यंतं॥असदिदमनात्मतत्वं विध्धि त्वं मरुमरीचिकाकल्पं॥२७॥अथते सं
प्रवक्ष्यामि स्वरूपं परमात्मनः॥यद्विज्ञाय नरो बंधान्मुक्तः कैवल्यमश्नुते॥२८॥
अस्ति कश्चित्स्वयंनित्यमहंप्रत्ययलंबनः॥अवस्थात्रयसाक्षी सन्पंचकोशवि
लक्षणः॥२९॥यो विजानाति सकलं जाग्रत्स्वप्नसुषुप्तिषु॥बुद्धितद्वृत्तिसद्भावमभा
वमहमित्ययं॥३०॥यः पश्यति स्वयं सर्वं यं न पश्यति कश्चन॥यश्चेतयति बु
ध्यादि न तद्यं चेतयत्ययं॥३१॥येन विश्वमिदं व्याप्तं यं न व्याप्नोति कश्चन॥
आभारूपमिदं सर्वं यं भांतमनुभात्ययं॥३२॥यस्य सन्निधिमात्रेण देहेंद्रिय
मनोधियः॥विषयेषु स्वकीयेषु वर्त्तंते प्रेरिता इव॥३३॥अहंकारादिदेहांता
विषयाश्च सुखादयः॥वेद्यंते घटवद्येन नित्यबोधस्वरूपिणा॥३४॥एषोंत ११

रात्मापुरुषः पुराणो निरंतराखंडसुखानुभूतिः ॥ सदैकरूपः प्रतिबोधमा
त्रो येनेषिता वागसवश्चरंति ॥३५॥ अत्रैव सत्वात्मनि धीगुहायामव्याकृता
काशउरुप्रकाशः ॥ आकाशउच्चै रविवत्प्रकाशाते स्वतेजसा विश्वमिदं प्रकाश
यन् ॥३६॥ ज्ञाता मनोहंकृतिविक्रियाणां देहेंद्रियप्राणकृतक्रियाणां ॥ अयो
ग्निवत्ताननुवर्त्तमानो न चेष्टते नो विकरोति किंचन ॥३७॥ न जायते नो म्रि
यते न वर्धते न क्षीयते नो विकरोति नित्यः ॥ विलीयमानेपि वपुष्यमुष्मिन्न ली
यते कुंभ इवांबरं स्वयं ॥३८॥ प्रकृतिविकृतिभिन्नः शुद्धबोधस्वभावः सदस
दिदमशेषं भावयन्निर्विशेषः ॥ विलसति परमात्मा जाग्रदादिष्ववस्थास्वहम
हमिति साक्षात्साक्षिरूपेण बुद्धेः ॥३९॥ नियामितमनसामुं त्वं स्वमात्मानमा

यम रूपेण

वि॰चू॰ १२ त्मन्यहमिति साक्षाद्विधिबुधिप्रसादात्॥ जनिमरणतरंगापारसंसारसिंधुं
प्रतर भव कृतार्थो ब्रह्मसंस्थः॥४०॥ अत्रानात्मन्यहमिति मतिर्बंध एषोस्य पुं
सः प्राप्तोज्ञानाज्जननमरणक्लेशसंपातहेतुः॥ येनैवायं वपुरिदमसत्सत्
त्यमित्यात्मबुध्या पुष्यत्युक्षत्यवति विषयैस्तंतुभिः कोशकृद्वत्॥४१॥ अतस्मिं
स्तद्बुद्धिः प्रभवति विमूढस्य तमसा विवेकाभावाद्वै स्फुरति भुजगे रज्जुधि
षणा॥ ततोनर्थव्रातो निपतति समादातुरधिकस्ततो योसद्ग्राहः स हि भवति
बंधः शृणु सखे॥४२॥ अखंडनित्याद्वयबोधशक्त्या स्फुरंतमात्मानमनंतवै
भवं॥ समावृणोत्यावृतिशक्तिरेषा तमोमयी राहुरिवार्कबिंबं॥४३॥ तिरो
भूते स्वात्मन्यमलतरतेजोवति पुमाननात्मानं मोहादहमिति शरीरं कलय १२

भ

ति ॥ ततः कामक्रोधप्रभृतिभिरमुं बंधनगुणैः परं विक्षेपाख्या रजस उरु शक्ति
र्व्यथयति ॥ ४४ ॥ महामोहग्राहग्रसनगलितात्मावगमनो धियो नानावस्थां
स्वयमभिनयंस्तद्गुणतया ॥ अपारे संसारे विषयविषपूरे जलनिधौ निमज्यो
न्मज्यायं भ्रमति कुमतिः कुत्सितमतिः ॥ ४५ ॥ भानुप्रभासंजनिताभ्रपंक्तिर्भा
नुं तिरोधाय विजृंभते यथा ॥ आत्मोदिताहंकृतिरात्मतत्वं तथा तिरोधाय विजृं
भते स्वयं ॥ ४६ ॥ कवलितदिननाथे दुर्दिने सांद्रमेघे व्यथयति हिमझंझा
वायुरुग्रो यथैतान् ॥ अविरततमसात्मन्यावृते मूढबुद्धिं क्षपयति बहुदुः
खैस्तीव्रविक्षेपशक्तिः ॥ ४७ ॥ एताभ्यामेव शक्तिभ्यां बंधः पुंसः समागतः ॥ या
भ्यां विमोहितो देहं मत्वात्मानं भ्रमत्ययं ॥ ४८ ॥ बीजं संसृतिभूमिजस्य तु त

वि॰चू॰ १३ मोदेहात्मधीरंकुरो रागः पल्लवमंबु कर्म तु वपुः स्कंधोसवः शाखिकाः॥ अ
ग्राणींद्रियसंहतिश्च विषयाः पुष्पाणि दुःखं फलं नानाकर्मसमुद्भवं बहुविधं भो
क्तात्रजीवः खगः॥४९॥ अज्ञानमूलोयमनात्मनो बंधो नैसर्गिको नादिरनंत ई
रितः॥ जन्माप्ययव्याधिजरादिदुःखप्रवाहपातं जनयत्यमुष्य॥१५०॥ नास्त्र
स्त्रैर्न शस्त्रैरनिलेन वह्निना छेत्तुं न शक्यो न च कर्मकोटिभिः॥ विवेकविज्ञा
नमहासिना विना धातुः प्रसादेन शितेन मंजसा॥५१॥ श्रुतिप्रमाणैकमतेः
स्वधर्मनिष्ठा तयैवात्मविशुद्धिरस्य॥ विशुद्धबुद्धेः परमात्मवेदनं तेनैव संसा
रसमूलनाशः॥५२॥ कोशैरन्नमयाद्यैः पंचभिरात्मा न संवृतो भाति॥ निज
शक्तिसमुत्पन्नैः शैवलपटलैरिवांबुवापिस्थं॥५३॥ तच्छैवालापनये स १३

न्यक्सलिलं प्रतीयते शुद्धं ॥ तृष्णासंतापहरं सद्यः सौख्यप्रदं परं पुंसः ॥
५४॥ पंचानामपि कोशानामपवादे भात्ययं शुद्धः ॥ नित्यानंदैकरसः प्रत्य
ग्रूपः स्वयंज्योतिः ॥५५॥ आत्मानात्मविवेकः कर्त्तव्यो बंधमुक्तये विदुषा ॥ तेनै
वानंदी भवति स्वं विज्ञाय सच्चिदानंदं ॥५६॥ मुंजादिषीकामिव दृश्यवर्गात्प्र
पंचमात्मानमसंगमक्रियं ॥ विविच्य तत्र प्रविलाप्य सर्वं तदात्मना तिष्ठति यः स
मुक्तः ॥५७॥ देहोयमन्नभवनोन्नमयस्तु कोशश्चान्नेन जीवति विनश्य
ति तद्विहीनः ॥ त्वक्चर्ममांसरुधिरास्थिपुरीषराशिर्नायं स्वयं भवितुमर्ह
ति नित्यशुद्धः ॥५८॥ पूर्वं जनेरपि मृतेरधुनायमस्ति जातक्षणक्षणगुणो

परः

नियतस्वभावः ॥ नैकोजडश्च घटवत्परिदृश्यमानः ॥ स्वात्मा कथं भवति
भावविकारवेत्ता ॥५९॥ पाणिपादादिमान्देहो नात्मा व्यंगेपि जीवनात् ॥ तत्त
च्छक्तेरनाशाच्च न नियम्यो नियामकः ॥६०॥ देहतद्धर्मतत्कर्म तदवस्था
दिसाक्षिणः ॥ स्वत एव स्वतःसिद्धं तद्वैलक्षण्यमात्मनः ॥६१॥ शल्य
राशिर्मांसलिप्तो मलपूर्णोतिकश्मलः ॥ कथं भवेदयं वेत्ता स्वयमेत
द्विलक्षणः ॥६२॥ त्वङ्मांसमेदोस्थिपुरीषराशावहंमतिं मूढजनः क
रोति ॥ विलक्षणं वेत्ति विचारशीलो निजस्वरूपं परमार्थभूतं ॥६३
देहोहमित्येव जडस्य बुद्धिर्देहे च जीवे विदुषस्त्वहं धीः ॥ विवेकवि

तानवतो महात्मनो ब्रह्माहमित्येव मतिः सदात्मनि ॥६४॥ अज्ञात्म
बुद्धिं त्यज मूढ बुद्धे त्वङ्मांसमेदोस्थि पुरीषराशौ ॥ सर्वात्मनि ब्रह्मणि नि
र्विकल्पे कुरुष्व शांतिं परमां भजस्व ॥६५॥ देहेंद्रियादावसति भ्रमोदितां
विद्वानहंतां न जहाति यावत् ॥ तावन्न तस्यास्ति विमुक्तिवार्त्ताप्यस्त्वेष वेदां
तनयांतदर्शी ॥६६॥ छायाशरीरे प्रतिबिंबगात्रे यत्स्वप्नदेहे हृदि कल्पितांगे ॥
यथात्मबुद्धिस्तव नास्ति काचिज्जीवच्छरीरे च तथैव मास्तु ॥६७॥ देहात्म
धीरेव नृणामसद्धियां जन्मादि दुःखप्रभवस्य बीजं ॥ यतस्ततस्त्वं जहि
तां प्रयत्नात्त्यक्ते तु चित्ते न पुनर्भवाशा ॥६८॥ कर्मेंद्रियैः पंचभिरंचितो

हरि

वि॰ चू॰ १५

यं प्राणोभवेत्प्राणमयस्तु कोशः ।। येनात्मवानन्नमयोनुपूर्णः प्रवर्त्ततेसौ

सकलक्रियासु ।। ६९ ।। नैवात्मापि प्राणमयो वायुविकारो गंता गंता वायु

वदंतर्बहिरेषः ।। यस्मात्किंचित्क्वापि वेत्तिस्वपतीष्टं स्वं वान्यं वा किंचननि न

त्यं परतंत्रः ।। ७० ।। ज्ञानेंद्रियाणि च मनश्च मनोमयः स्यात्कोशो ममाह

मिति वस्तुविकल्पहेतुः ।। संज्ञादिभेदकलनाकलितो बलीयांस्तत्पूर्वको

शमभिपूर्य वि[illegible]जृंभते यः ।। ७१ ।। पंचेंद्रियैः पंचभिरेव होतृभिः प्रचीयमा

नो विषयाज्यधारया ।। जाज्वल्यमानो बहुवासनेंधनैर्मनोमयो

ग्निर्दहति प्रपंचं ।। ७२ ।। न ह्यस्त्यविद्या मनसोतिरिक्ता म १५

नोह्यविद्याभवबंधहेतुः॥ तस्मिन्विनष्टेसकलंविनष्टंविजृंभितेस्मि
न्सकलंविजृंभते॥७३॥ स्वप्नेर्थशून्येसृजतिस्वशक्त्याभोक्त्रादिवि
श्वंमनएवसर्वं॥ तथैवजाग्रत्यपिनोविशेषस्तत्सर्वमेतन्मनसोविजृ
भणं॥७४॥ सुषुप्तिकालेमनसिप्रलीनेनैवास्तिकिंचित्सकलप्रसिद्धेः
अतोमनःकल्पितएवपुंसःसंसारएतस्यनचस्तुतोस्ति॥७५॥ वा
युनानीयतेमेघःपुनस्तेनैवनीयते॥ मनसाकल्प्यतेबंधोमोक्ष
स्तेनैवकल्प्यते॥७६॥ देहादिसर्वविषयपरिकल्प्यरागंबध्नाति
तेनपुरुषंपशुवद्गुणेन॥ वैरस्यमत्रविषवत्सुविधायपश्चादेनं
विमोचयतितन्मनएवबंधात्॥७७॥ तस्मान्मनःकारणमस्यजं

तोबंधस्यमोक्षस्यचवाविधानो॥बंधस्यहेतुर्मलिनंरजोगुणैर्मोक्ष
स्यशुधंविरजोतमस्कं॥७८॥विवेकवैराग्यगुणातिरेकाच्छुद्धत्वमा
साद्यमनोविमुक्त्यैभवसतोबुधिमतामुमुक्षोस्ताभ्यांदृढाभ्यांभवि
तव्यमग्रे॥७९॥मनोनाममहाव्याघ्रोविषयारण्यभूमिषु॥चरत्य
त्रनगछंतुसाधवोयेमुमुक्षवः॥८०॥मनःप्रसूतेविषयानशेषान्
स्थूलात्मनासूक्ष्मतयाचभोक्तुः॥शरीरवर्णाश्रमजातिभेदान्गु
णाक्रियाहेतुफलानिनित्यं॥८१॥असंगचिद्रूपममुंविमोह्यदेहेंद्रि १६
यप्राणगुणैर्निबध्य॥अहंममेतिभ्रमयत्यजस्रंमनःस्वकृत्येषुफ
लोपभुक्तिषु॥८२॥अध्यासदोषात्पुरुषस्यसंसृतिरध्यासबंध

सति

स्वमुनैवकल्पितः ॥ रजस्तमोदोषवतो विवेकिनोजन्मादिदुःखस्यनिदा
नमेतत् ॥ १८३ ॥ अतः प्राहुर्मनोविद्यांपडितास्तत्वदर्शिनः ॥ येनैवभ्राम्यतेवि
श्वंवायुनैवाभ्रमंडलं ॥ १८४ ॥ तन्मनः शोधनंकार्यंप्रयत्नेनमुमुक्षुणा ॥ वि
शुद्धे चैतस्मिन्मुक्तिः करफलायते ॥ १८५ ॥ मोक्षैकसक्त्याविषयेषुरागंनिर्मू
ल्यसंन्यस्यचसर्वकर्म ॥ सच्छ्रद्धयायः श्रवणादिनिष्ठोरजः स्वभावंसधुनो
तिबुद्धेः ॥ १८६ ॥ मनोमयोनापिभवेत्परात्माह्याद्यंतवत्वात्परिणामिभावात् ॥
दुःखात्मकत्वाद्विषयत्वहेतोर्द्रष्टाहिदृश्यात्मतयाननष्टः ॥ १८७ ॥ बुद्धिर्बुद्धींद्रि
यैः सार्धंसवृत्तिः कर्तृलक्षणः ॥ विज्ञानमयकोशः स्यात्पुंसः संसारकारणं ॥
॥ १८८ ॥ अनुव्रजच्चित्प्रतिबिंबशक्तिर्विज्ञानसंज्ञः प्रकृतेर्विकारः ॥ ज्ञानक्रिया

वानहमित्यजस्रं देहेंद्रियादिष्वभिमन्यतेभ्रशं ॥ ९९ ॥ अनादिकालोयमहंस्वभा
वोजीवः समस्तव्यवहारवोढा ॥ करोति कर्माण्यनुपूर्ववासनः पुण्यान्यपुण्यानि च त
त्फलानि ॥ १०० ॥ भुंक्ते विचित्रास्वपि योनिषु व्रजन्नायाति निर्यात्यध ऊर्ध्वमेषः ॥ अस्यैव वि
ज्ञानमयस्य जाग्रत्स्वप्नाद्यवस्थाः सुखदुःखभोगः ॥ १०१ ॥ देहादिनिष्ठाश्रमधर्मकर्मगुणा
भिमानः सततं ममेति ॥ विज्ञानकोशोयमतिप्रकाशः प्रकृष्टसान्निध्यवशात्परात्मनः
॥ १०२ ॥ अतोभवत्येष उपाधिरस्य यदात्मधीः संसरति भ्रमेण ॥ १०३ ॥ योयंविज्ञानमयः ॥
प्राणेषु हृदि स्फुरत्स्वयंज्योतिः ॥ कूटस्थः स आत्मा कर्ता भोक्ता भवत्युपाधिस्थः ॥ १०४ ॥
स्वयंपरिच्छेदमुपेत्य बुद्धेस्तादात्म्यदोषेण परं मृषात्मनः ॥ सर्वात्मकः सन्नपि वीक्ष्यते
स्वं स्वतः पृथक्त्वेन मृदो घटानिव ॥ १०५ ॥ उपाधिसंबंधवशात्परात्माप्युपाधिधर्माननु

भातिसद्गुणः॥अयोग्निविकारानविकारिवन्हिवत्सदैकरूपोपिपरस्वभावात्॥१९६

शिष्यः॥भ्रमेणाप्यन्यथावास्तुजीवभावःपरात्मनः॥तदुपाधेरनादित्वान्नानादे

र्नाशइष्यते॥१९७॥अतोस्यजीवभावोपिनित्योभवतिसंसृतिः॥ननिवर्त्तेततन्मोक्षः

कथंमेश्रीगुरोवद॥१९८॥गुरुः॥सम्यक्पृष्टंत्वयाविद्वन्सावधानेनतच्छृणु॥प्रामाणि

कीनभवतिभ्रांत्यामोहितकल्पना॥१९९॥भ्रांतिंविनात्वसंगस्यनिष्क्रियस्यनिराकृतेः

नघटेतार्थसंबंधोनभसोनीलतादिवत्॥२००॥यस्यद्रष्टुर्निर्गुणस्याक्रियस्यप्र

त्यग्बोधानंदरूपस्यबुद्धेः॥भ्रांत्याप्राप्तोजीवभावोनसत्योमोहापायेनास्त्यवस्तु

स्वभावात्॥१॥यावद्भ्रांतिस्तावदेवास्यसत्तामिथ्याज्ञानजृंभितस्यप्रमादात्॥

रज्ज्वांसर्पोभ्रांतिकालीनएवभ्रांतेर्नाशेनैवसर्पोस्तितद्वत्॥२॥अनादित्वमविद्या

वि० चू०
१९

या: कार्यस्यापि तथेष्यते ॥ उत्पन्नायां तु विद्यायां नाविद्यमेकेनापि ॥ ३ ॥ प्रबोधे
स्वाप्नवत्सर्वं समूलं विनश्यति ॥ अनाद्यपीदं नो नित्यं प्रागभाव इति स्फुटं ॥ ४ ॥ अना
देरपि विध्वंसः प्रागभावस्य वीक्षितः ॥ यद्बुद्ध्युपाधिसंबंधात्परिकल्पितमात्मनि ॥
५ ॥ जीवत्वं न ततोन्यत्तु स्वरूपेण विलक्षणं ॥ संबंधः स्वात्मनो बुद्ध्या मिथ्याज्ञानपु
रःसरः ॥ ६ ॥ विनिवृत्तिर्भवेत्तस्य सम्यक्ज्ञानेन नान्यथा ॥ ब्रह्मात्मैकत्वविज्ञानं स
म्यक्ज्ञानं श्रुतेर्मतं ॥ ७ ॥ तदात्मानात्मनोः सम्यग्विवेकेनैव सिध्यति ॥ ततो विवेकः क
र्तव्यः प्रत्यगात्मसदात्मनोः ॥ ८ ॥ जलं पंकवदत्यंतं पंकापाये जलं स्फुटं ॥ ९ ॥ अस
न्निवृत्तौ तु सदात्मनः स्फुटं प्रतीतिरेतस्य भवेत्प्रतीचः ॥ ततो निरासः करणीय ए १९
व सदात्मनः साध्वहमादिवस्तुनः ॥ १० ॥ अतो नायं परात्मा स्याद्विज्ञानमयश

द्भाक्॥ विकारित्वाज्जडत्वाच्च परिच्छिन्नत्वहेतुतः॥११॥ दृश्यत्वाद्व्यभिचारित्वान्ना
नित्यो नित्य इष्यते॥११॥ आनंदप्रतिबिंबचुंबिततनुर्वृत्तिस्तमोजृंभिता स्यादानंद
मयः प्रियादिगुणकः स्वेष्टार्थलाभोदयः॥ पुण्यस्यानुभवे विभाति कृतिनामानं
दरूपः स्वयं भूत्वानंदति यत्र साधु तनुभृन्मात्रः प्रयत्नं विना॥१२॥ आनंदमयको
शस्य सुप्तौ स्फूर्तिरुत्कटा॥ स्वप्नजागरयोरीषदिष्टसंदर्शनादिना॥१३॥ नैवाय
मानंदमयः परात्मा सोपाधिकत्वात्प्रकृतेर्विकारात्॥ कार्यत्वहेतोः सुकृतक्रियाया
विकारसंघातसमाहितत्वात्॥१४॥ पंचानामपि कोशानां निषेधे युक्तितः श्रुतेः॥ त
न्निषेधावधिः साक्षी बोधरूपोऽवशिष्यते॥१५॥ योयमात्मा स्वयंज्योतिः पंचकोश
विलक्षणः॥ अवस्थात्रयसाक्षी सन्निर्विकारो निरंजनः॥१६॥ सदानंदः सविज्ञेयः

चि० चं०
१९

स्वात्मत्वेन विपश्चिता ॥ शिष्यः ॥ मिथ्यात्वेन निषिद्धेषु कोशेष्वेतेषु पंचसु ॥ १७ ॥ स
र्वाभावं विना किंचिन्न पश्याम्यत्र हे गुरो ॥ विद्वेयं किमु वस्त्वास्ति स्वात्मनात्र विपश्चिता
॥ १८ ॥ गुरुः ॥ सत्यमुक्तं त्वया विद्वन्निपुणोसि विचारणे ॥ अहमादिविकारास्ते तदभा
वोयमप्यथ ॥ १९ ॥ सर्वे येनानुभूयंते यः स्वयं नानुभूयते ॥ तमात्मानं वेदितारं वि
द्धि बुध्यास्व सूक्ष्मया ॥ २० ॥ तत्साक्षिकं भवेत्तत्तद्यद्यद्येनानुभूयते ॥ कस्याप्यननु
भूतार्थे साक्षित्वं परनोयुज्यते ॥ २१ ॥ असौ स्वसाक्षिको भावो यतः स्वेनानुभूयते ॥
अतः परं स्वयं साक्षात्प्रत्यगात्मा न चेतरः ॥ २२ ॥ जाग्रत्स्वप्नसुषुप्तिषु स्फुटतरं योसौ
समुज्जृंभते प्रत्यग्रूपतया सदाहमहमित्यंतः स्फुरन्नेकधा ॥ नानाकारविकार
भागिन इमान्पश्यन्नहंधीमुखान्नित्यानंदचिदात्मना स्फुरति तं विद्धि स्वमेतं हृ १९
दि ॥ २३ ॥

घटोदके बिंबितमर्कबिंबमालोक्य मूढो रविमेव मन्यते ॥ तथा चिदाभासमुपाधि
संस्थं भ्रांत्याहमित्येव जडोभिमन्यते ॥२४॥ घटं जलं तद्गतमर्कबिंबं विहाय सर्वं वि
निवीस्यतेर्कः ॥ तटस्थ एतत्त्रितयाभासकः स्वयंप्रकाशो विदुषा यथा तथा ॥२५
देहं धियं चित्प्रतिबिंबमेवं विसृज्य बुद्धौ निहितं गुहायां ॥ द्रष्टारमात्मानम
खंडबोधं सर्वप्रकाशं सदसद्विलक्षणं ॥२६॥ नित्यं विभुं सर्वगतं सुसूक्ष्मं मंत
र्बहिःशून्यमनन्यमात्मनः ॥ विज्ञाय सम्यङ्निजतत्त्वमेतत्पुमान्विपाप्मा विरजो वि
मृत्युः ॥२७॥ विशोक आनंदघनो विपश्चित्स्वयं कुतश्चिन्न बिभेति कश्चित् ॥ नान्योस्ति
पंथा भवबंधमुक्तेर्विना स्वतत्त्वावगमं मुमुक्षोः ॥२८॥ ब्रह्माभिन्नत्वविज्ञानं भव
मोक्षस्य कारणं ॥ येनाद्वितीयमानंदं ब्रह्म संपद्यते बुधः ॥२९॥ ब्रह्मभूतस्

वि० चू०
२०

स्तुसंसृत्यै विद्वान्नावर्त्ततेपुनः ॥ विज्ञातव्यमतः सम्यक् ब्रह्मात्माभिन्नत्वमात्म
नः ॥२०॥ सत्यं ज्ञानमनंतं ब्रह्मशुद्धं परं स्वतःसिद्धं ॥ नित्यानंदैकरसं प्रत्यगभि
न्नंनिरंतरं जयति ॥३१॥ सदिदं परमाद्वैतं स्वस्मादन्यस्य वस्तुनोभावात् ॥ नह्य
न्यदस्तिकिंचित्सम्यक्परमार्थतत्वबोधदशायां ॥३२॥ यदिदं सकलं विश्वं ना
नारूपं प्रतीतमज्ञानात् ॥ तत्सर्वं ब्रह्मैव प्रत्यस्ताशेषभावनादोषं ॥३३॥ मृत्कार्य
भूतोपि मृदोनभिन्नः कुंभोस्ति सर्वत्र तु मृत्स्वरूपात् ॥ नकुंभरूपं पृथगस्ति कुंभः
कुतोमृषाकल्पितनाममात्रः ॥३४॥ केनापि मृद्भिन्नतया स्वरूपं घटस्य संदर्शयि
तुंनशक्यते ॥ अतोघटः कल्पितएवमोहान्मृदेव सत्यं परमार्थभूतं ॥३५॥ सद्ब्र
ह्मकार्यं सकलं सदेव सन्मात्रमेतन्नततोन्यदस्ति ॥ अस्तीतियोवक्तिनतस्यमोहो २०

कालेहि

विनिर्गतोनिद्रितवत्प्रजल्पः ॥ ३६ ॥ ब्रह्मैवेदं विश्वमित्येव वाणी श्रौती ब्रूतेथर्वणी
ष्ठावरिष्ठा [redacted] ॥ तस्मात्सर्वं ब्रह्ममात्रं हि विश्वं नाधिष्ठानाद्भिन्नतारोपितस्य ॥ ३७ ष्ठा
सत्यं यदि स्याज्जगदेतदात्मनोनंतत्वहानिर्निगमाप्रमाणता ॥ असत्यवादित्वम
पीशितुः स्यान्नैतत्त्रयं साधुहितं महात्मनां ॥ ३८ ॥ ईश्वरो वस्तुतत्त्वज्ञो न चाहं तेष्व
वस्थितः ॥ न च मत्स्थानि भूतानीत्येवमेव व्यचीकथत् ॥ ३९ ॥ यदि सत्यं भवेद्विश्वं
सुषुप्तावुपलभ्यतां ॥ यन्नोपलभ्यते किंचिदतोसत्स्वप्नवन्मृषा ॥ ४० ॥ अतः पृथङ्ना
स्ति जगत्परात्मनः पृथक्प्रतीतिस्तु मृषा गुणाहिवत् ॥ आरोपितस्यास्ति किमर्थ
वत्ताधिष्ठानमाभाति तथा भ्रमेण ॥ ४१ ॥ भ्रांतस्य यद्यद्भ्रमतः प्रतीतं ब्रह्मैव तत्तद्र
जतं हि शुक्तिः ॥ इदंतया ब्रह्म सदैव रूप्यते त्वारोपितं ब्रह्मणि नाममात्रं ॥ ४२ ॥ अ

तः परं ब्रह्म सदद्वितीयं विशुद्धविज्ञानघनं निरंजनं ॥ प्रशांतमाद्यंतविहीनमक्रि
यं निरंतरानंदरसस्वरूपं ॥४३॥ निरस्तमायाकृतसर्वभेदं नित्यं ध्रुवं निष्कलमप्रमे
यं ॥ अरूपमव्यक्तमनाख्यमव्ययं ज्योतिः स्वयं किंचिदिदं चकास्ति ॥४४॥ ज्ञातृज्ञा
नज्ञेयशून्यमनंतं निर्विकल्पकं ॥ केवलाखंडचिन्मात्रं परं तत्वं विदुर्बुधाः ॥४५॥
अहेयमनुपादेयं मनोवाचामगोचरं ॥ अप्रमेयमनाद्यंतं ब्रह्मपूर्णमहं महः ॥
४६ ॥ तत्वंपदाभ्यामभिधीयमानयोर्ब्रह्मात्मनोः शोधितयोर्यदित्थं ॥ श्रुत्या तयो
स्तत्वमसीति सम्यगेकत्वमेव प्रतिपाद्यते मुहुः ॥४७॥ ऐक्यं तयोर्लक्षितयोर्न वा
च्ययोर्निगद्यतेन्योन्यविरुद्धधर्मिणोः ॥ खद्योतभान्वोरिव राजभृत्ययोः कूपां
बुराश्योः परमाणुमेर्वोः ॥४८॥ तयोर्विरोधोयमुपाधिकल्पितो न वास्तवः कश्चि

दुपाधिरेषः ॥ ईशस्य माया महदादिकारणं जीवस्य कार्यं श्रणु पंच कोशाः ॥४९
एतावुपाधी परजीवयोस्तयोः सम्यङ्निरासे न परो न जीवः ॥ राज्यं नरेंद्रस्य भट
स्य खेटकस्तयोरपोहे न भटो न राजा ॥५०॥ अथात आदेश इति श्रुतिः स्वयं
निषेधति ब्रह्मणि कल्पितं द्वयं ॥ श्रुतिप्रमाणानुगृहीतबोधात्तयोर्निरासः कर
णीय एव ॥५१॥ नेदं नेदं कल्पितत्वान्न सत्यं रज्जौ दृष्टव्यालवत्स्वप्नवच्च ॥ इत्थं
दृश्यं साधुयुक्त्या व्यपोह्य ज्ञेयः पश्चादेकभावस्तयोर्यः ॥५२॥ ततस्तु तौ लक्षण
या सुलक्ष्यौ तयोरखंडैकरसत्वसिद्धये ॥ नालं जहत्या न तथाजहत्या किंतूभया
र्थात्मिकयैव भाव्यं ॥५३॥ स देवदत्तोयमितीह चैकता विरुद्धधर्मांशमपा
स्य कथ्यते ॥ यथा तथा तत्त्वमसीति वाक्ये विरुद्धधर्मानुभयत्र हित्वा ॥५४

वि॰चू॰ संलक्ष्यचिन्मात्रतयासदात्मनोरखंडभावःपरिचीयतेबुधैः॥एवंमहावा
२२ क्यशतेनकथ्यतेब्रह्मात्मनोरैक्यमखंडभावः॥५५॥अस्थूलमित्येतदसन्निर
स्यसिद्धंस्वतोव्योमवदप्रतर्क्यं॥अतोमृषामात्रमिदंप्रतीतंजहीहियत्स्वात्म
तयागृहीतं॥५६॥ब्रह्माहमित्येवविशुद्धबुध्याविद्धिस्वमात्मानमखंडबो
धं॥५७॥सत्कार्यंसकलंघटादिसततंमृन्मात्रमेवाभितस्तद्वत्सज्जनितंसदा
स्मा त्मकमिदंसन्मात्रमेवाखिलं॥यस्मान्नास्तिसतःपरंकिमपितत्सत्यंसआत्मास्वयंत
स्मात्तत्वमसिप्रशांतममलंब्रह्माद्वयंयत्परं॥५८॥निद्राकल्पितदेशकालविष
यज्ञात्रादिसर्वंयथामिथ्यातद्वदिहापिजाग्रतिजगत्स्वाज्ञानकार्यत्वतः॥ २२
यस्मादेवमिदंशरीरकरणप्राणाहमाद्यप्यसत्तस्मात्तत्वमसिप्रशांतमम

लं ब्रह्माद्वयं यत्परं ॥५९॥ जातिनीतिकुलगोत्रदूरगं नामरूपगुणदोषवर्जि
तं ॥ देशकालविषयातिवर्तियद्ब्रह्मतत्त्वमसिभावयात्मनि ॥६०॥ यत्परं सकलवा
गगोचरं गोचरं विमलबोधचक्षुषः ॥ शुद्धचिद्घनमनादि वस्तु यद्ब्रह्म० ॥६१॥
षड्भिरूर्मिभिरयोगियोगिहृद्भावितं न करणैर्विभावितं ॥ बुध्यवेद्यमनवद्यभूति
यद्ब्रह्म० ॥६२॥ भ्रांतिकल्पितजगत्कलाश्रयं स्वाश्रयं च सदसद्विलक्षणं ॥ निष्क
लं निरुपमानवद्धि यद्ब्रह्म० ॥६३॥ जन्मवृद्धिपरिणत्यपक्षयव्याधिनाशन
विहीनमव्ययं ॥ विश्वसृष्ट्यवविघातकारणं ब्रह्म० ॥६४॥ अस्तभेदमनपास्
तलक्षणंनि स्तरंगजलराशिनिश्चलं ॥ नित्यमुक्तमविभक्तमूर्ति यद्ब्रह्म० ॥६५
एकमेव सदनेककारणं कारणांतरनिरास्यकारणं ॥ कार्यकारणविलक्षणं स्व

यं ब्रह्म तत्० ॥६६॥ निर्विकल्पकमनल्पमक्षरं यत्क्षराक्षरविलक्षणं परं ॥ नि
त्यमव्ययसुखं निरंजनं ब्रह्म तत्० ॥६७॥ यद्विभाति सदनेकधा भ्रमान्नामरूपगु
णविक्रियात्मना ॥ हेमवत्स्वयमविक्रियं सदा ब्रह्म तत्० ॥६८॥ यच्चकास्त्यनप
रं परात्परं प्रत्यगेकरसमात्मलक्षणं ॥ सत्यचित्सुखमनंतमव्ययं ब्रह्म तत्० ॥६९
उक्तमर्थमिव चात्मनि स्वयं भावयन्प्रथितयुक्तिभिर्धिया ॥ संशयादिरहितं
करांबुवत्तेन तत्वनिगमो भविष्यति ॥७०॥ स्वं बोधमात्रं परिशुद्धतत्त्वं विज्ञाय
संघे नृपवच्च सैन्ये ॥ तदात्मनैवात्मनि सर्वदा स्थितो विलापय ब्रह्मणि दृश्य
जातं ॥७१॥ बुद्धौ गुहायां सदसद्विलक्षणं ब्रह्मास्ति सत्यं परमद्वितीयं ॥ तदात्म
नायोऽत्र वसेद्गुहायां पुनर्न तस्यांगगुहाप्रवेशः ॥७२॥ ज्ञाते वस्तुन्यपि बलवती वा २३

सनानादिरेषा कर्त्ताभोक्ताप्यहमिति दृढा यास्य संसारहेतुः॥ प्रत्यग्दृष्ट्यात्म
नि निवसता सापनेया प्रयत्नान्मुक्तिं प्राहुस्तदिह मुनयो वासनातानवं यत्॥७३
अहं ममेति यो भावो देहाक्षादावनात्मनि॥ अध्यासोयं निरस्तव्यो विदुषा स्वात्म
निष्ठया॥७४॥ ज्ञात्वा स्वं प्रत्यगात्मानं बुद्धितद्वृत्तिसाक्षिणं॥ सोहमित्येव सद्वृत्त्या
स्वान्यत्रात्ममतिं जहि॥२७५॥ लोकानुवर्त्तनं त्यक्त्वा त्यक्त्वा देहानुवर्त्तनं॥ शास्त्रानुव
र्त्तनं त्यक्त्वा स्वाध्यासापनयं कुरु॥७६॥ लोकवासनया जंतोः शास्त्रवासनयापि च
देहवासनया ज्ञानं यथावन्नैव जायते॥७७॥ संसारकारागृहमोक्षमिच्छोरयोम
यं पादनिबंधशृंखलं॥ वदंति तज्ज्ञाः पटु वासनात्रयं यस्माद्विमुक्तः समुपैति मु
दि क्तिं॥७८॥ जलादिसंपर्कवशात्प्रभूत दुर्गंधधूतागुरुदिव्यवासना॥ संघर्षणेनैव

वि०चू०
२४

विभातिसम्याग्विधूयमानेसतिबाह्यगंधे॥७९॥अंतःश्रितानंतदुरंतवासनाधू
लीविलिप्तापरमात्मवासना॥प्रज्ञातिसंघर्षणतोवि[illegible]शुद्धाप्रतीयतेचंदनगंधव
स्फुटं॥८०॥अनात्मवासनाजालैस्तिरोभूतात्मवासना॥नित्यात्मनिष्ठयातेषांना
व शेभातिस्वयंस्फुटं॥८१॥यथायथाप्रत्यगवस्थितंमनस्तथातथामुंचतिबाह्यवास
ना॥निःशेषमोक्षेसतिवासनानामात्मानुभूतिःप्रतिबंधशून्या॥८२॥स्वात्मन्येवसदा
स्थित्यामनोनश्यतियोगिनः॥वासनानांक्षयश्चातःस्वाध्यासापनयंकुरु॥८३॥तमो
द्वाभ्यांरजःसत्वात्सत्वंशुद्धेननश्यति॥तस्मात्सत्वमवष्टभ्यस्वाध्या०॥८४॥प्रारब्धंपुष्य
तिवपुरितिनिश्चित्यनिश्चलः॥धैर्यमालंब्ययत्नेनस्वाध्या०॥८५॥नाहंजीवःपर २४
ब्रह्मेत्यतद्व्यावृत्तिपूर्वकं॥वासनावेगतःप्राप्तस्वाध्या०॥८६॥श्रुत्यायुक्त्यास्वा

उपरत्याऽस्ताता सार्वात्म्यमात्मनः ॥ क्वचिद्दाभासतः प्राप्तस्वाध्या० ॥ ८७ ॥ अन्ना
दानविसर्गाभ्यामीषभास्तिक्रियामुनेः ॥ तदेकनिष्ठयानिशं स्वाध्या० ॥ ८८ ॥ तत्त्वम
स्यादिवाक्योत्थब्रह्मात्मैकत्वबोधतः ॥ ब्रह्मण्यात्मत्वदार्ढ्याय स्वाध्या० ॥ ८९ ॥ अहंभा
वस्य देहेऽस्मिन्निःशेषविलयावधि ॥ सावधानेन युक्तात्मा स्वाध्या० ॥ ९० ॥ प्रतीतिर्जीव
जगतोः स्वप्नवद्भाति यावता ॥ तावन्निरंतरं विद्वन् स्वाध्या० ॥ ९१ ॥ निद्राया लोकवा
र्तायाः शब्दादेरपि विस्मृतेः ॥ क्वचिन्नावसरं दत्वा चिंतयात्मानमात्मनि ॥ ९२ ॥ मा
तापित्रोर्मलोद्भूतं मलमांसमयं वपुः ॥ त्यक्त्वा चांडालवद्दूरं ब्रह्मीभूय कृती भव ॥
९३ ॥ घटाकाशं महाकाश इवात्मानं परात्मनि ॥ विलाप्याखंडभावेन तूष्णीं भव स
दा मुने ॥ ९४ ॥ स्वप्रकाशमधिष्ठानं स्वयंभूय सदात्मना ॥ ब्रह्मांडमपि पिंडांतं त्यज्यतां
रु

मलभांडवत् ॥ ९५ ॥ चिदात्मनि सदानंदे देहारूढामहंधियं ॥ निवेश्य लिंगमुत्सृ
ज्य केवलो भव सर्वदा ॥ ९६ ॥ यत्रैष जगदाभासो दर्पणांतः पुरं यथा ॥ तद्ब्रह्माहमि
ति ज्ञात्वा कृतकृत्यो भविष्यसि ॥ ९७ ॥ यत्सत्यरूपं निजरूपमाद्यं चिदद्वयानंदमरू
पमक्रियं ॥ तदेत्य मिथ्यावपुरुत्सृजैतच्छैलूषवद्वेषमुपात्तमात्मनः ॥ ९८ ॥ सर्वात्म
ना दृश्यमिदं मृषैव नैवाहमर्थः क्षणिकत्वदर्शनात् ॥ जानाम्यहं सर्वमिति प्रतीतिः
कुतोहमादेः क्षणिकस्य सिध्येत् ॥ ९९ ॥ अहंपदार्थस्त्वहमादिसाक्षी नित्यः सुषुप्ता
वपि भावदर्शनात् ॥ ब्रूते ह्यजो नित्य इति श्रुतिः स्वयं तत्प्रत्यगात्मा सदसद्विलक्षणः ॥
१०० ॥ विकारिणां सर्वविकारवेत्ता नित्याविकारो भवितुं समर्हति ॥ मनोरथस्व
प्नसुषुप्तिषु स्फुटं पुनः पुनर्दृष्टमसत्वमेतयोः ॥ १ ॥ अतोभिमानं त्यज मांसपिंडे

पिंडाभिमानिन्यपि बुध्दिकॢप्ते ॥ कालत्रयाबाध्यमखंडबोधं ज्ञात्वा स्वमात्मा
नमुपैति शांतिं ॥ २ ॥ त्यजाभिमानं कुलगोत्रनामरूपाश्रमेष्वार्द्रशवाश्रितेषु ॥ लिं
गस्य धर्मानपि कर्तृतादींस्त्यक्त्वा भवाखंडसुखस्वरूपः ॥ ३ ॥ संत्यन्ये प्रतिबंधाः पुं
सः संसारहेतवो दृष्टाः ॥ तेषामेषां मूलं प्रथमविकारो भवत्यहंकारः ॥ ४ ॥ याव
त्स्यात्स्वस्य संबंधोऽहंकारेण दुरात्मना ॥ तावन्न लेशमात्रापि मुक्तिवार्त्ता विलक्ष
णा ॥ ५ ॥ अहंकारग्रहान्मुक्तः स्वरूपमुपपद्यते ॥ चंद्रवद्विमलः पूर्णः सदानंदः स्व
यंप्रभः ॥ ६ ॥ यो वा पुरे सोऽहमिति प्रतीतो बुद्ध्या विकॢप्तस्तमसातिमूढया ॥ त
स्यैव निःशेषतया विनाशे ब्रह्मात्मभावः प्रतिबंधशून्यः ॥ ७ ॥ ब्रह्मानंदनिधिर्म
हाबलवताहंकारघोराहिना संवेष्ट्यात्मनि रक्ष्यते गुणमयैश्चंडैस्त्रिभिर्मस्तकैः ॥

वि॰चू॰
२६

विज्ञानाख्यमहासिनाश्रुतिमताच्छित्त्वा शीर्षत्रयंनिर्मूल्याहिमिमंनिधिंसुखकरंधीरोनुभोक्तुंक्षमः॥८॥यावद्वायत्किंचिद्विषदोषस्फूर्त्तिश्चेदेहे देहे॥कथमारोग्यायभवेत्तद्वदहंतापियोगिनोमुक्त्यै॥९॥अहमोंतत्यंनिवृत्यातत्कृतनानाविकल्पसंहृत्या॥प्रत्यक्तत्वविवेकादिदमहमस्मीतिविंदतेतत्त्वं॥१०॥अहंकारेकर्त्तर्यहमितिमतिंमुंचसहसाविकारात्मन्यात्मप्रतिफलजुषिस्वास्थितिमुषि॥यदध्यासात्प्राप्ताजनिमृतिजरादुःखबहुलाप्रतीचश्चिन्मूर्त्तेस्तवसुखतनोःसंसृतिरियं॥११॥सदैकरूपस्यचिदात्मनोविभोरानंदमूर्त्तेरनवद्यकीर्त्तेः॥नैवान्यथाक्वाप्यविकारिणस्तेविनाहमध्यासममुष्यसंसृतिः॥१२॥तस्मादहंकारमिमंस्वशत्रुंभोक्तुर्गलेकंटकवत्प्रतीतं॥विच्छिद्यविज्ञानमहासिनास्फुटंभुंक्ष्व

२६

त्मसाम्राज्यसुखंयथेष्टं॥१३॥ततोहमादेर्विनिवर्त्यवृत्तिंसंत्यक्तरागःपरमार्थ
लाभात्॥तूष्णींसमास्वात्मसुखानुभूत्यापूर्णात्मनाब्रह्मणिनिर्विकल्पः॥१४॥समूल
कृत्तोपिमहानहंपुनर्व्युल्लेखितःस्याद्यदिचेतसाक्षणं॥संजीव्यविक्षेपशतंकरोतिन
भस्वताप्रावृषिवारिदोयथा॥१५॥निगृह्यशत्रोरहमोवकाशःक्वचिन्नदेयोविषया
नुचिंतया॥सएवसंजीवनहेतुरस्यप्रक्षीणजंबीरतरोरिवांबु॥१६॥देहात्मनासंस्थि
तएवकामीविलक्षणःकामयिताकथंस्यात्॥अतोर्थसंधानपरत्वमेवभेदप्रसक्त्याभव
बंधहेतुः॥१७॥कार्यप्रवर्धनाद्बीजप्रवृद्धिःपरिदृश्यते॥कार्यनाशाद्बीजनाशस्त
स्मात्कार्यंनिरोधयेत्॥१८॥वासनावृद्धितःकार्यंकार्यवृध्याचवासना॥वर्धतेसर्व
थापुसःसंसारोननिवर्तते॥१९॥संसारबंधविछित्यैतद्द्वयंप्रदहेद्यतिः॥वासना

वि०चू०
२७

वद्धिरेताभ्यांचिंतयाक्रियया बहिः॥२०॥ताभ्यांप्रवर्द्धमानासासूतेसंसृतिमा
त्मनः॥त्रयाणांचक्षयोपायःसर्वावस्थासुसर्वदा॥२१॥सर्वत्रसर्वतःसर्वंब्रह्ममात्रा
वलोकनं॥सद्भाववासनादार्ढ्यात्तत्त्रयंलयमश्नुते॥२२॥क्रियानाशेभवेच्चिंताना
शोस्माद्वासनाक्षयः॥वासनाप्रक्षयोमोक्षःसाजीवन्मुक्तिरिष्यते॥२३॥सद्वासना
स्फूर्तिविजृंभणेसत्यसौप्रलीनाप्यहमादिवासना॥अतिप्रकृष्टाप्यरुणप्रभायां
विलीयतेसाधुयथातमिस्रा॥२४॥तमस्तमःकार्यमनर्थजालंनदृश्यतेसत्युदितेदि
नेशे॥तथाद्वयानंदरसानुभूतौनैवास्तिबंधोनचदुःखगंधः॥३२५॥दृश्यंप्रती
२ तंप्रविलापयन्सन्सँमात्रमानंदघनंविभायन्॥समाहितःसन्बहिरंतरंवाकालं
नयेथाःसतिकर्मबंधे॥३२६॥प्रमादोब्रह्मनिष्ठायांनकर्तव्यःकदाचन॥प्रमादोमृत्यु २७

रित्याह भगवान्ब्रह्मणः सुतः ॥२७॥ न प्रमादादनर्थोन्यो ज्ञानिनः स्वस्वरूपतः ॥
ततो मोहस्ततोहंधीस्ततो बंधस्ततो व्यथा ॥२८॥ विषयाभिमुखं दृष्ट्वा विद्वांसममपि
विस्मृतिः ॥ विक्षेपयति धीदोषैर्योषा जारमिव प्रियं ॥२९॥ यथापकृष्टं शैवालं क्षणमात्रं
न तिष्ठति ॥ आवृणोति तथा माया प्राज्ञं वापि पराङ्मुखं ॥३०॥ लक्ष्यच्युतं चेद्यदि चि
त्तमीषद्बहिर्मुखं सन्निपतेत्ततस्ततः ॥ प्रमादतः प्रच्युतकेलिकंदुकः सोपानपंक्तौ प
तितो यथा तथा ॥३१॥ विषयेष्वाविशच्चेतः संकल्पयति तद्गुणान् ॥ सम्यक्संकल्पना
त्कामः कामात्पुंसः प्रवर्त्तनं ॥३२॥ ततः स्वरूपविभ्रंशो विभ्रष्टस्तु पतत्यधः ॥ पति
तस्य विना नाशं पुनर्नारोह ईक्ष्यते ॥३३॥ संकल्पं वर्जयेत्तस्मात्सर्वानर्थस्य कार
णं [redacted] ॥३४॥ अतः प्रमादान्न परोस्ति मृत्युर्विवेकिनो ब्रह्मविदो समाधौ ॥ समाहितः

वि॰ चू॰
२८

सिद्धिमुपैति सम्यक्समाहितात्माभव सावधानः ॥३५॥ जीवतो यस्य कैवल्यं विदे
हे च स केवलः ॥ यत्किंचित्पश्यता भेदं भयं ब्रूते यजुःश्रुतिः ॥३६॥ यदा कदा वापि विपश्चि
देष ब्रह्मण्यनंतेप्यणुमात्रभेदं ॥ पश्यत्यथामुष्य भयं तदेव यद्वीक्षितं भिन्नतया प्र
मादात् ॥३७॥ श्रुतिस्मृतिन्यायशतैर्निषिद्धे दृश्येत्र यः स्वात्ममतिं करोति ॥ उपैति
दुःखोपरि दुःखजातं निषिद्धकर्त्ता स मलिम्लुचो यथा ॥३८॥ सत्याभिसंधानरतो वि
मुक्तो महत्त्वमात्मीयमुपैति नित्यं ॥ मिथ्याभिसंधानरतस्तु नश्येद्दृष्टं यदेतद्यदचौ
रचारयोः ॥३९॥ यतिरसदनुसंधिं बंधहेतुं विहाय स्वयमयमहमस्मीत्यात्मदृष्ट्यै
व तिष्ठेत् ॥ सुखयति ननु निष्ठा ब्रह्मणि स्वानुभूत्या हरति परमविद्याकार्यदुःखं प्रतीतं
॥४०॥ बाह्यानुसंधिः परिवर्धयेत्फलं दुर्वासनामेव ततस्ततोधिकां ॥ ज्ञात्वा विवेकैः प २८

रिहृत्य बाह्यं स्वात्मानुसंधिं विदधीत नित्यं ॥४१॥ बाह्ये निरुद्धे मनसः प्रसन्नता मनः

प्रसादे परमात्मदर्शनं ॥ तस्मिन्सुदृष्टे भवबंधनाशो बहिर्निरोधः पदवी विमुक्तेः ॥४२

कः पंडितः सन्सदसद्विवेकी श्रुतिप्रमाणः परमार्थदर्शी ॥ जानन्हि कुर्यादसतोवलंबं स्व

पातहेतोः शिशुवन्मुमुक्षुः ॥४३॥ देहादिसंसक्तिमतो न मुक्तिर्मुक्तस्य देहाद्यभिमत्य

भावः ॥ सुप्तस्य नो जागरणं न जाग्रतः स्वप्नस्तयोर्भिन्नगुणाश्रयत्वात् ॥४४॥ अंतर्ब

हिः स्वं स्थिरजंगमेषु ज्ञात्वात्मनाधारतया विलोक्य ॥ त्यक्ताखिलोपाधिरखंडरूपः

पूर्णात्मना यः स्थित एष मुक्तः ॥४५॥ सर्वात्मना बंधविमुक्तिहेतुः सर्वात्मभावान्न प

रोस्ति कश्चित् ॥ दृश्याग्रहे सत्युपपद्यतेसौ सर्वात्मभावोस्य सदात्मनिष्ठया ॥४६॥

दृश्यस्याग्रहणं कथं नु घटते देहात्मना तिष्ठतो बाह्यार्थानुभवप्रसक्तमनसस्तत्तत्क्रियां

र्था

वि॰ चू॰
२९

कुर्वतः ॥ सन्यस्ताखिलधर्मकर्मविषयैर्नित्यात्मनिष्ठापरैस्तत्वज्ञैः करणीयमात्म
निसदानंदेछुभिर्यत्नतः ॥४७॥ सार्वात्म्यसिद्धयेभिक्षोः कृतश्रवणकर्मणः ॥ समा
धिंविदधात्येषाशांतोदांत इतिश्रुतिः ॥४८॥ आरूढशक्तेरहमोविनाशः कर्त्तुंनशक्यः
सहसापिपंडितैः ॥ येनिर्विकल्पाख्यसमाधिनिश्चलास्तानंतरानंतभवाहिवासना
॥४९॥ अहंबुध्यैवमोहिन्यायोजयित्वावृतेर्बलात् ॥ विक्षेपशक्तिः पुरुषं विक्षेपयति
तद्गुणैः ॥ ५०॥ विक्षेपशक्तिविजयोविषमोविधातुंनिःशेषमावरणशक्तिनिवृत्य
भावे ॥ दृग्दृश्ययोः स्फुटपयोजलवद्विभागे नश्येत्तदावरणमात्मनिचस्वभावत
॥५१॥ निःसंशयेनभवतिप्रतिबंधशून्योविक्षेपणंनहितदायदिचेन्मृषार्थे ॥५२
सम्यग्विवेकः स्फुटबोधजन्योविभज्यदृग्दृश्यपदार्थतत्वं ॥ छिनत्तिमायाकृ २९

तमोहबंधंयस्माद्विमुक्तस्यपुनर्नसंसृतिः॥५३॥परावरैकत्वविबोधवन्हि
र्दहत्यविद्यागहनंसशेषं॥किंस्यात्पुनःसंसरणस्यबीजमद्वैतभावंसमुपेयुषो
स्य॥५४॥आवरणस्यनिवृत्तिर्भवतिहिसम्यक्पदार्थदर्शनतः॥मिथ्याज्ञानविनाश
स्तस्माद्विक्षेपजनितदुःखनिवृत्तिः॥५५॥एतत्त्रितयंदृष्टंसम्यग्रज्जुस्वरूपवि
ज्ञानात्॥तस्माद्वस्तुसतत्वंज्ञातव्यंबंधमुक्तयेविदुषा॥५६॥अयोग्नियोगादि
वसत्समन्वयान्मात्रादिरूपेणविजृंभतेधीः॥तत्कार्यमेतत्त्रितयंयतोमृषादृष्टं
भ्रमस्वप्नमनोरथेषु॥५७॥अतोविकाराःप्रकृतेरहंमुखादेहावसानाविषया
श्चसर्वे॥क्षणेन्यथाभावतयाह्यमीषामसत्त्वमात्मातुकदापिनान्यथा॥५८॥
नित्याद्वयाखंडचिदेकरूपोबुध्यादिसाक्षीसदसद्विलक्षणः॥अहंपदप्रत्ययलक्षि

तार्थः प्रत्यक्सदानंदघनः परात्मा ॥५९॥ इत्थं विपश्चित्सदसद्विभज्य निश्चित्य
तत्त्वं निजबोधदृष्ट्या ॥ ज्ञात्वा स्वमात्मानमखंडबोधं तेभ्यो विमुक्तः स्वयमेव शाम्यति
॥६०॥ सप्तभूमिकाः ॥ ज्ञानभूमिः शुभेच्छाख्या प्रथमा समुदाहृता ॥ विचारणा द्वि
तीया स्यात्तृतीया तनुमानसा ॥६१॥ सत्वापत्तिश्चतुर्थी स्यात्ततो संसक्तिनामि
का ॥ पदार्थाभावना षष्ठी सप्तमी तुर्यगा स्मृता ॥६२॥ अज्ञानहृदयग्रंथेर्निःशेष
विलयस्तदा ॥ समाधिनाविकल्पेन यदा[illegible]द्वैतात्मदर्शनं ॥६३॥ त्वमहमिदमितीयं क
ल्पना बुद्धिदोषात्प्रभवति परमात्मन्यद्वये निर्विशेषे ॥ प्र[illegible]लेबि सति समाधावस्य
सर्वो विकल्पो विलयनमुपगच्छेद्वस्तुतत्त्वावधृत्या ॥६४॥ शांतो दांतः परमुपरतः
क्षांतियुक्तः समाधिं कुर्वन्नित्यं कलयति यतिः स्वस्य सर्वात्मभावं ॥ तेनाविद्याति

मिरजनितान्साधु दध्यौगेचिकत्मान्ब्रह्माकृत्यानिवसतिस्कखंनिष्क्रियोनिर्विकल्पः
॥६५॥ समाहितायेप्रविलाप्यबाह्यंश्रोत्रादिचेतःसमहंचिदात्मनि॥ तएवमुक्ताभव
पाशबंधैर्नान्येतुपारोक्ष्यकथाभिधायिनः॥६६॥ उपाधियोगात्स्वयमेवभिद्यतेचोपा
ध्यपोहेस्वयमेवकेवलः॥ तस्मादुपाधेर्विलयायविद्वान्वसेत्सदाकल्पसमाधिनिष्ठया॥
॥६७॥ सतिसक्तोनरोयातिसद्भावंह्येकनिष्ठया॥ कीटकोभ्रमरंध्यायन्भ्रमरत्वायकल्
पते॥६८॥ क्रियांतरासक्तिमपास्यकीटकोध्यायन्नलित्वंह्यलिभावमृच्छति॥
तथैवयोगीपरमात्मतत्त्वंध्यात्वासमायातितदेकनिष्ठया॥६९॥ अतीवसूक्ष्मंपरमात्म
तत्त्वंनस्थूलदृष्ट्याप्रतिपत्तुमर्हति॥ समाधिनात्यंतसूक्ष्मवृत्त्याज्ञातव्यमार्यैरति
शुद्धबुद्धिभिः॥७०॥ यथासुवर्णंपुटपाकशोधितंत्यक्त्वामलंस्वात्मगुणंसमृच्छति॥ तथा

वि॰चू॰
३१

मनःसत्वरजस्तमोमलंध्यानेनसंत्यज्यसमेतितत्वं॥७१॥निरंतराभ्यासवशात्त
दित्थंपक्वंमनोब्रह्मणिलीयतेयदा॥तदासमाधिःसविकल्पवर्जितःस्वतोद्वयानंद
रसानुभावकः॥७२॥समाधिनानेनसमस्तवासनाग्रंथेर्विनाशोखिलकर्मनाशः॥
अंतर्बहिःसर्वतएवसर्वदास्वरूपविस्फूर्तिरयत्नतःस्यात्॥७३॥श्रुतेःशतगुणंविद्या
न्मननंमननादपि॥निदिध्यासंलक्षगुणमनंतंनिर्विकल्पकं॥७४॥अतःसमाधत्स्व
यतेंद्रियःसन्निरंतरंशांतमनाःप्रतीचि॥४निर्विकल्पकसमाधिनास्फुटंब्रह्मतत्वम
वगम्यतेध्रुवं॥नान्यथाचलतयामनोगतेःप्रत्ययांतरविमिश्रितंभवेत्॥३७५॥४वि
ध्वंसयध्वांतमनाद्यविद्ययाकृतंसदेकत्वविलोकनेन॥७६॥योगस्यप्रथमद्वारं
वाङ्निरोधोपरिग्रहः॥निराशाचनिरीहाचनित्यमेकांतशीलता॥७७॥एकांतस्थि ३१

तिरिंद्रियोपरमणेहेतुर्दमश्चेतसः संरोधे करणं शमेनाविलयंयायादहंवासना
तेनानंदरसानुभूतिरचलाब्रात्मीसदायोगिनस्तस्माच्चित्तनिरोधएवसततंकार्यः
प्रयत्नान्मुनेः॥७८॥ वाचंनियच्छात्मनितंनियच्छबुद्धौधियंयच्छचबुद्धिसाक्षिणि॥तं
चापिपूर्णात्मनिनिर्विकल्पेविलाप्यशांतिंपरमांभजस्व॥७९॥ देहप्राणेंद्रियमनोबु
द्ध्यादिभिरुपाधिभिः॥यैर्यैर्वृत्तेःसमायोगस्तत्तद्भावोस्ययोगिनः॥८०॥ तन्निवृत्तेर्मुनेः
सम्यक्सर्वोपरमणंसुखं॥संदृश्यतेसदानंदरसानुभवविप्लवः॥८१॥ अंतस्त्यागोब
हिस्त्यागोविरक्तस्यैवयुज्यते॥त्यजत्यंतर्बहिःसंगंविरक्तस्तुमुमुक्षया॥८२॥ बहिस्तुविष
येःसंगंतथांतरहमादिभिः॥विरक्तएवशक्नोतित्यक्तुंब्रह्मणिनिष्ठितः॥८३॥ वैराग्य
बोधौपुरुषस्यपक्षिवत्पक्षौविजानीहिविलक्षणत्वं॥विमुक्तिसौधाग्रलताधिरोहणं

चि॰चू॰
३२

द्वाभ्यां विना नान्यतरेण सिध्यति ॥८४॥ अत्यंत वैराग्यवतः समाधिः समाहितस्यै
व चदृढप्रबोधः ॥ प्रबुद्धतत्वस्य हि बंधमुक्ति र्मुक्तात्मनो नित्यसुखानुभूतिः ॥८५॥ वै
राग्यान्नपरं सुखस्य जनकं पश्यामि वश्यात्मनस्तच्चेच्छुद्धतरात्मबोधसहितं स्वारा
ज्यसाम्राज्यधुक् ॥ एतद्द्वारमजस्रमुक्तियुवतेर्यस्मात्त्वमस्मात्परं सर्वत्रास्पृहया सदा
त्मनि सदा प्रज्ञां कुरु श्रेयसे ॥८६॥ आशां छिंधि विषोपमेषु विषयेष्वेषैव मृत्योः सृ
तिस्त्यक्त्वा जातिकुलाश्रमेष्वभिमतिं मुंचातिदूरात्क्रियाः ॥ देहादावसति त्यजात्मधिष
णां प्रज्ञां कुरुष्वात्मनि त्वं द्रष्टास्यमनोसि निर्द्वयपरं ब्रह्मासि यद्वस्तुतः ॥८७॥ लक्ष्ये ब्र
ह्मणि मानसं दृढतरं संस्थाप्य बाह्येंद्रियं स्वस्थाने विनिवेश्य निश्चलतनुश्चोपेक्ष्य दे
हस्थितिं ॥ ब्रह्मात्मैक्यमुपेत्य तन्मयतया चाखंडवृत्त्यानिशं ब्रह्मानंदरसं पिबात्म ३२

निमुदाश्रन्यैः किमन्यैर्भ्रशं ॥८८॥ अनात्मचिंतनं त्यक्त्वा कश्मलं दुःखकारणं ॥ चिंत
यात्मानमानंदरूपं यन्मुक्तिकारणं ॥८९॥ एषः स्वयंज्योतिरशेषसाक्षी विज्ञानकोशे वि
लसत्यजस्रं ॥ लक्ष्यं विधायैनमसद्विलक्षणमखंडवृत्त्यात्मतयानुभावय ॥९०॥ एतम
च्छिन्नया वृत्त्या प्रत्ययांतरशून्यया ॥ उल्लेखयन्विजानीयात्स्वस्वरूपतया स्फुटं ॥९१॥ अत्रा
त्मत्वं दृढीकुर्वन्नहमादिषु संत्यजन् ॥ उदासीनतया तेषु तिष्ठेत्स्फुटघटादिवत् ॥९२॥ विशु त्
द्धमंतःकरणं स्वरूपे निवेश्य साक्षिण्यवबोधमात्रे ॥ शनैः शनैर्निश्चलतामुपानयन्
पूर्णात्म्यमेवानुविलोकयेत्ततः ॥९३॥ देहेंद्रियप्राणमनोहमादिभिः स्वाज्ञानकॢप्तैर
खिलैरुपाधिभिः ॥ विमुक्तमात्मानमखंडरूपं पूर्णं महाकाशमिवावलोकयेत् ॥९४॥
घटकलशकुसूलमुखैः सूचिर्गगनमुपाधिशतैर्विमुक्तमेकं ॥ भवति न विविधं त

थैवशुद्धंपरमहमाद्विविमुक्तमेकमेव॥९५॥ब्रह्मादिस्तंबपर्यंतामृषामात्राउपाध
यः॥ततःपूर्णंस्वमात्मानंपश्येदेकात्मनास्थितं॥९६॥यत्रभ्रांत्याकल्पितंयद्विवेके
तत्तन्मात्रंनैवतस्माद्विभिन्नं॥भ्रांतेर्नाशेभ्रांतिदृष्टाहितत्वंरज्जुस्तद्वद्विश्वमात्र
स्वरूपं॥९७॥स्वयंब्रह्मास्वयंविष्णुःस्वयमिंद्रःस्वयंशिवः॥स्वयंविश्वमिदंसर्वंस्व
स्मादन्यंनकिंचन॥९८॥अंतःस्वयंचापिबहिःस्वयंचस्वयंपुरस्तात्स्वयमेवपश्चा
त्॥स्वयंह्यवाच्यांस्वयमप्युदीच्यांतथोपरिष्टात्स्वयमप्यधस्तात्॥९९॥तरंगफेन
भ्रमबुद्बुदादिसर्वंस्वरूपेणजलंयथातथा॥चिदेवदेहाद्यहमंतमेतत्सर्वंचिदेवैक
रसंविशुद्धं॥४००॥सदेवेदंसर्वंजगदवगतंवाङ्मनसयोःसतोन्यन्नास्त्येवप्रकृ
तिपरसीम्निस्थितवतः॥पृथक्किंमृत्स्नायाःकलशघटकुंभाद्यवगतंवदत्येषभ्रांत

स्त्वमहमिति मायामदिरया ॥१॥ क्रियासमभिहारेण यत्र नान्यदिति श्रुतिः ॥ ब्र
वीति द्वैतराहित्यं मिथ्याध्यासनिवृत्तये ॥२॥ आकाशवन्निर्मलनिर्विकल्पं निःसी
मनिष्पंदननिर्विकारं ॥ अंतर्बहिःशून्यमनन्यमद्वयं स्वयं परं ब्रह्म किमस्ति बोध्यं ॥३
वक्तव्यं किमु विद्यते त्र बहुधा ब्रह्मैव जीवः स्वयं ब्रह्मैतज्जगदापराणु सकलं ब्रह्माद्वि
तीयं श्रुतिः ॥ ब्रह्मैवाहमिति प्रबुद्धमतयः संत्यक्तबाह्याः स्फुटं ब्रह्मीभूय वसंति संत
तचिदानंदात्मनैतद्ध्रुवं ॥४॥ जहि मलमयकोशेहंधियोत्थापिताशां प्रसभमनिल
कल्पे लिंगदेहेपि पश्चात् ॥ निगमगदितकीर्त्तिं नित्यमानंदमूर्त्तिं स्वयमिति परिचीय
ब्रह्मरूपेण तिष्ठ ॥५॥ शवाकारं यावद्भजति मनुजस्तावदशुचिः परेभ्यः स्यात्क्लेशो
जननमरणव्याधिनिलयः ॥ यदात्मानं शुद्धं कलयति शिवाकारमचलं तदा तेभ्यो मु

चि॰चू॰
३४

तोभवतिहितदाहश्रुतिरपि ॥ ६ ॥ स्वात्मन्यारोपिताशेषाभासवस्तुनिरासतः ॥ स्व
यमेवपरंब्रह्मपूर्णमद्वयमक्रियं ॥ ७ ॥ समाहितायांसतिचित्तवृत्तौपरात्मनिब्रह्मणिनि
र्विकल्पे ॥ नदृश्यतेकश्चिदयंविकल्पः प्रजल्पमात्रः परिशिष्यतेततः ॥ ८ ॥ असत्कल्पो
विकल्पोयंविश्वमित्येकवस्तुनि ॥ निर्विकारेनिराकारेनिर्विशेषेभिदाकुतः ॥ ९ ॥ द्रष्टृ
दर्शनदृश्यादिभावशून्यैकवस्तुनि ॥ निर्वि॰ ॥ १० ॥ कल्पार्णवइवात्यंतपरिपूर्णैकवस्तु
नि ॥ निर्विका॰ ॥ ११ ॥ तेजसीवतमोयत्रविलीनंभ्रांतिकारणं ॥ अद्वितीयेपरतत्वेनिर्विशे॰
॥ १२ ॥ एकात्मकेपरेतत्वेभेदवार्ताकथंवसेत् ॥ सुषुप्तौसुखमात्रायांभेदः केनावलोकि
तः ॥ १३ ॥ नह्यस्ति विश्वंपरतत्वबोधात्सदात्मनिब्रह्मणिनिर्विकल्पके ॥ कालत्रयेना
प्यहिरीक्षितोगुणेनह्यंबुबिंदुर्मृगतृष्णिकायां ॥ १४ ॥ मायामात्रमिदंद्वैतमद्वैतंपर ३४

मार्थतः॥इति ब्रूते श्रुतिः साक्षात्सुषुप्तावनुभूयते॥१५॥अनन्यत्वमधिष्ठानादा
रोप्यस्य निरीक्षितं॥पंडितै रज्जुसर्पादौ विकल्पो भ्रांतिजीवनः॥१६॥चित्तमूलो विक
ल्पोयं चित्ताभावेन कश्चन॥अतश्चित्तं समाधेहि प्रत्यग्रूपे परात्मनि॥१७॥किमपि स
ततबोधं केवलानंदरूपं निरुपममतिवेलं नित्यमुक्तं निरीहं॥निरवधिगगनाभं नि
ष्कलं निर्विकल्पं हृदि कलयति विद्वान् ब्रह्म पूर्णं समाधौ॥१८॥प्रकृतिविकृतिशून्यं
भावनातीतभावं समरसमसमानं मानसंबंधदूरं॥निगमवचनसिद्धं नित्यम
स्मत्प्रसिद्धं हृदि क०॥१९॥अजरममरमस्ताभासवस्तुस्वरूपं स्तिमितसलिलरा
शिप्रख्यमाख्याविहीनं॥शमितगुणविकारं शाश्वतं शांतमेकं हृदि कल०॥२०॥
समाहितांतःकरणस्वरूपे विलोकयात्मानमखंडवैभवं॥विछिंधि बंधं भवगंधगं

विं०चू०
३५

धितं यत्नेन पुंस्त्वं सफलं कुरुष्व ॥२१॥ सर्वोपाधिर्मुक्तं विनि सच्चिदानंदमद्वयं ॥भा
वयात्मानमात्मस्थं न भूयः कल्पसेऽध्वने ॥२२॥ छायेव पुंसः परिदृश्यमानमाभास
रूपेण फलानुभूत्या॥ शरीरमाराच्छववन्निरस्तं पुनर्न संधत्त इदं महात्मा ॥२३॥स
ततविमलबोधानंदरूपं समेत्य त्यजजडमलरूपोपाधिमेतं सुदूरे ॥अथपुनरपि
नैषस्मर्यतां वांतवस्तु स्मरणविषयभूतं कल्पते कुत्सनाय ॥२४॥ समूलमेतत्स
रिदाह्य वन्हौ सदात्मनि ब्रह्मणि निर्विकल्पके॥ ततः स्वयं नित्यविशुद्धबोधानंदा
त्मनातिष्ठति विद्वरिष्ठः ॥४२५॥ प्रारब्धसूत्रग्रथितं शरीरं प्रयातु वातिष्ठतु गोरि
वस्त्रक्॥ न तत्पुनः पश्यति तत्त्ववेत्तानंदात्मनि ब्रह्मणि लीनवृत्तिः॥२६॥ अखंडानं
दमात्मानं विज्ञाय स्वस्वरूपतः॥ किमिच्छन्कस्य कामाय देहं पुष्णाति तत्त्ववित् ॥२७॥ ३५

संसिध्धस्यफलं त्वेतज्जीवन्मुक्तस्य योगिनः॥ बहिरंतः सदानंदरसास्वादनमा
त्मनि॥२८॥ वैराग्यस्यफलं बोधोबोधस्योपरतिःफलं॥स्वानंदानुभवाछांतिरेषै
वोपरतेःफलं॥२९॥ दृष्टदुःखेष्वनुद्वेगोविद्यायाःप्रस्तुतंफलं॥यत्कृतंभ्रांतिवेलायां
नानाकर्मजुगुप्सितं॥३१॥ यद्युत्तरोत्तराभावेपूर्वपूर्वंतुनिष्फलं॥ निवृत्तिःपर उ
मातृप्तिरानंदोनुपमःस्वतः॥३०॥ पश्चान्नरोविवेकेनतत्कथंकर्तुमर्हति॥३२॥
विद्याफलंस्यादसतोनिवृत्तिः प्रवृत्तिरज्ञानफलंतदीक्षितं॥ तज्ज्ञाज्ञयोर्यन्मृगत
ष्णिकादौनोचेद्विदे दृष्टफलंकिमस्मात्॥३३॥अज्ञानहृदयग्रंथिविनाशोयद्य
शेषतः॥अनिछोर्विषयःकिंनुप्रवृत्तेःकारणंस्वतः॥३४॥वासनानुदयोभो
ग्येवैराग्यस्यतदावधिः॥अहंभावोदयाभावो बोधस्यपरमावधिः॥३५॥लीनव

ते रनुसतिर्मर्यादोपरतेस्तु सा॥ ब्रह्माकारतयासदास्थिततयानिर्मुक्तब्रा
ह्यार्थधीरन्यावेदितभोग्यभोगकलनोनिद्रालुवद्बालवत्॥ स्वप्नालोकितलोक
वज्जगदिदंपश्यन्क्वचिल्लब्धधीरास्तेकश्चिदनंतपुण्यफलभुग्धन्यःसमान्यो
भुवि॥३६॥ स्थितप्रज्ञोयतिरयंयःसदानंदमश्नुते॥ ब्रह्मण्येवविलीनात्मानि
र्विकारोविनिष्क्रियः॥३७॥ ब्रह्मात्मनोःशोधितयोरेकभावावगाहिनी॥ निर्वि
कल्पाचचिन्मात्रावृत्तिःप्रज्ञेतिकथ्यते॥३८॥ सुस्थितासौभवेद्यस्यस्थितप्रज्ञः
सउच्यते॥३९॥ यस्यस्थिताभवेत्प्रज्ञायस्यानंदोनिरंतरः॥ प्रपंचोविस्मृतप्रा
यःसजीवन्मुक्तइष्यते॥४०॥ लीनधीरपिजागर्तियोजाग्रद्धर्मवर्जितः॥ बोधो
निर्वासनोयस्यसजीव०॥४१॥ शांतसंसारकलनःकलावानपिनिष्कलः॥ यःस

चित्तोविनिश्चितः सजी०॥४२॥अतीताननुसंधानं भविष्यदविचारणं॥औ
दासिन्यमपिप्राप्तेजीवन्मुक्तस्यलक्षणं॥४३॥चित्तातआत्मनोयस्यब्रह्मभावोध्रु
तेर्बलात्॥भवबंधविनिर्मुक्तः सजी०॥४३॥देहेंद्रियादौकर्त्तव्येममाहंभाववर्जितः
औदासिन्येनयस्तिष्ठेत्सजीव०॥४४॥नतस्यमिथ्यार्थसमर्थनेछानसंग्रहस्त
जगतोपिदृष्टः॥तथात्वरत्तिर्यदिचेन्मषार्थेननिद्रयामुक्तइतीष्यतेध्रुवं॥४५॥
वर्त्तमानेपिदेहेस्मिंश्छायावदनुवर्त्तिनि॥अहंताममताभावोजीवन्मुक्तस्यलक्ष
णं॥४६॥देहेंद्रियेष्वहंभावइदंभावस्तदन्यके॥यस्यनोभवतः क्वापिसजी०॥४७
नप्रत्यग्ब्रह्मणोर्भेदंकदापिब्रह्मसर्गयोः॥प्रज्ञयायोविजानातिसजी०॥४८॥सा
धुभिः पूज्यमानेस्मिन्पीड्यमानेपिदुर्जनैः॥समभावोभवेद्यस्यसजीवन्मु०॥४९

वि० चू०
३८

गुणदोषविशिष्टेऽस्मिन्स्वभावेनविलक्षणे॥ सर्वत्रसमदर्शित्वंजीवन्मुक्तस्य
लक्षणं॥४५०॥ इष्टानिष्टार्थसंप्राप्तौ समदर्शितयात्मनि॥ उभयत्राविकारित्वंजी
वन्मुक्तस्य०॥५१॥ ब्रह्मानंदरसास्वादासक्तचित्ततयायतेः॥ अंतर्बहिरभिज्ञानंजी
व०॥५३॥ यत्रविप्रेष्टाविषयाः परेरितानदिप्रवाहाइववारिराशौ॥ लीनाश्चसन्
मात्रतयानविक्रियामुत्पादयंत्येषयतिर्विमुक्तः॥५४॥ विज्ञातब्रह्मतत्त्वस्ययथा
पूर्वंनसंसृतिः॥ अस्तिचेन्नसविज्ञातब्रह्मभावोबहिर्मुखः॥५५॥ प्राचीनवासना
स वेगादसौसंसरतीतिचेत्॥ नसदेकत्वविज्ञानान्मंदीभवतिवासना॥५६॥ अत्यंतका
मुकस्यापिवृत्तिः कुंठतिमातरि॥ तथैवब्रह्मणि ज्ञातेपूर्णानंदेमनीषिणः॥५७॥ नि
दिध्यासनशीलस्यबाह्यप्रत्ययईक्ष्यते॥ ब्रवीतिश्रुतिरेतस्यप्रारब्धंफलदर्श ३८

सुखाद्यनुभवोयावत्तावत्प्रारब्धमिष्यते॥फलोदयःक्रियापूर्वोनिष्क्रियोनहि
कुत्रचित्॥५९॥अहंब्रह्मेतिविज्ञानात्कल्पकोटिशतार्जितं॥संचितंविलयंयातिप्र
बोधात्स्वप्नकर्मवत्॥६०॥यत्कृतंस्वप्नवेलायांपुण्यंवापापमुल्बणं॥सुप्तोत्थितस्यकिं
तत्स्यात्स्वर्गायनरकायच॥६१॥स्वमसंगमुदासीनंपरिज्ञायनभोयथा॥नश्लिष्य
तेयतिःकिंचित्कदाचिद्भाविकर्मभिः॥६२॥ननभोघटयोगेनसुरागंधेनलिप्यते॥
तथात्मोपाधियोगेनतद्धर्मैर्नैवलिप्यते॥६३॥ज्ञानोदयात्पुरारब्धंकर्मज्ञानान्नन
श्यति॥अदत्वास्वफलंलक्ष्यमुद्दिश्योत्सृष्टबाणवत्॥६४॥व्याघ्रबुद्ध्याविनिर्मुक्तो
बाणःपश्चात्तुगोमतौ॥नतिष्ठतिछिनत्त्येवलक्ष्यंवेगेननिर्भरं॥६५॥प्रारब्धंबलव
त्तरंखलुविदांभोगेनतस्यक्षयःसम्यग्ज्ञानहुताशनेनविलयःप्राक्संचितागामिनां॥

ब्रह्मात्मैक्यमवेक्ष्यतन्मयतयायेसर्वदासंस्थितास्तेषांतान्त्रितयंनहिक्वचिदपिब्र
ह्मैवतेनिर्गुणं॥६६॥उपाधितादात्म्यविहीनकेवलब्रह्मात्मनैवात्मनितिष्ठतोमुनेः॥प्रा
रब्धसद्भावकथानयुक्तास्वप्नार्थसंबंधकथेवजाग्रतः॥६७॥नहिप्रबुद्धःप्रतिभास
देहेदेहोपयोगिन्यपिचप्रपंचे॥करोत्यहंतांममतामिदंतांकिंतुस्वयंतिष्ठतिजाग
रेण॥६८॥नतस्यमिथ्यार्थसमर्थनेच्छानसंग्रहस्तज्जगतोपिदृष्टः॥तत्रानुवृत्तिर्य
दिचेन्मृषार्थेननिद्रयामुक्तइतीष्यतेध्रुवं॥६९॥तद्वत्परेब्रह्मणिवर्तमानःसदात्म
नातिष्ठतिनान्यदीक्ष्यते॥[illegible]स्मृतिर्यथास्वप्नविलोकितार्थेतथाविदःप्राशनमोच
नादौ॥७०॥कर्मणानिर्मितोदेहःप्रारब्धंतस्यकल्प्यतां॥नानादेरात्मनोयुक्तं
नैवात्माकर्मनिर्मितः॥७१॥अजोनित्यःशाश्वतइतिब्रूतेश्रुतिरमोघवाक्॥तदात्म ३८

त्मनातिष्ठतोस्य कुतः प्रारब्धकल्पना ॥ ७२ ॥ प्रारब्धः सिध्यति तदा यदा देहात्मनास्थि
तिः ॥ देहात्मभावो नैवेष्टः प्रारब्धं त्यज्यतामतः ॥ ७३ ॥ शरीरस्यापि प्रारब्धकल्पना भ्रां
तिरेव हि ॥ अध्यस्तस्य कुतः सत्वमसत्यस्य कुतो जनिः ॥ ७४ ॥ अजातस्य कुतो नाशः
प्रारब्धमसतः कुतः ॥ ज्ञानेनाज्ञानकार्यस्य समूलस्य लयो यदि ॥ ४ ७५ ॥ तिष्ठत्ययं क
थं देह इति शंकावतो जडान् ॥ समाधातुं बाह्यदृस्या प्रारब्धं वदति श्रुतिः ॥ ७६ ॥ न तु दे
हादिसत्यत्वबोधनाय विपश्चितां ॥ ७७ ॥ परिपूर्णमनाद्यंतमप्रमेयमविक्रियं ॥ एकमे
वाद्वयं ब्रह्म नेह नानास्ति किंचन ॥ ७८ ॥ सद्घनं चिद्घनं नित्यमानंदघनमक्रियं ॥ एक
मे० ॥ ७९ ॥ प्रत्यगेकरसं पूर्णमनंतं सर्वतोमुखं ॥ एकमे० ॥ ८० ॥ अहेयमनुपादेय
मनादेयमनाश्रयं ॥ एकमे० ॥ ८१ ॥ निर्गुणं निष्कलं सूक्ष्मं निर्विकल्पं निरंजनं ॥ एक० ॥ ८

वि०च०
३९

सत्समन्वद्धं स्वतः सिद्धं शुद्धबुद्धमनीदृशं ॥ एकमे० ॥ ८३ ॥ अनिरूप्यस्वरूपं यन्मनो
वाचामगोचरं ॥ एकमे० ॥ ८२ ॥ निरस्तरागा निरपास्तभोगाः शांताः सुदांता यतयोम
हांतः ॥ विज्ञाय तत्वं परमेतदंतः प्राप्ताः परां निर्वृतिमात्मयोगात् ॥ ८४ ॥ भवानपीदंप
रतत्वमात्मनः स्वरूपमानंदघनं विचार्य ॥ विधूय मोहं स्वमनः प्रकल्पितं मुक्तः कृता
र्थो भवतु प्रबुद्धः ॥ ८५ ॥ समाधिना साधुविनिश्चलात्मना पश्यात्मतत्वं स्फुटबोध
चक्षुषा ॥ निःसंशयं सम्यगवेक्षितश्चेच्छ्रुतः पदार्थो न पुनर्विकल्प्यते ॥ ८६ ॥ स्वस्या
विद्याबंधसंबधमोक्षात्सत्यज्ञानानंदरूपात्मलब्धौ ॥ शास्त्रं युक्तिर्देशिकोक्तिः प्रमाणं
चांतः सिद्धा स्वानुभूतिः प्रमाणं ॥ ८७ ॥ बंधो मोक्षश्च तृप्तिश्च चिंतारोग्यक्षुदादयः ॥
स्वेनैव वेद्या यज्ज्ञानं परेषामानुमानिकं ॥ ८८ ॥ तटस्थिता बोधयंति गुरवः श्रुतयो

ना

३९

हरि

यथा॥ प्रज्ञयैव तरेद्विद्वानीश्वरानुगृहीतया॥ ८९॥ स्वानुभूत्या स्वयं ज्ञात्वा स्व
मात्मानमखंडितं॥ संसिद्धः संमुखं तिष्ठेन्निर्विकल्पात्मनात्मनि॥ ९०॥ वेदांतसिद्धांतनि
रुक्तिरेषा ब्रह्मैव जीवः सकलं जगच्च॥ अखंडरूपस्थितिरेव मोक्षो ब्रह्माद्वितीये श्रुतयः
प्रमाणं॥ ९१॥ इति गुरुवचनाच्छ्रुतिप्रमाणात्परमवगम्य सतत्त्वमात्मयुक्त्या॥ प्रशमित
करणः समाहितात्मा क्वचिदचलाकृतिरात्मनिष्ठितोभू त्॥ ९२॥ कंचित्कालं समाधा
य परे ब्रह्मणि मानसं॥ व्युत्थाय परमानंदादिदं वचनमब्रवीत्॥ ९३॥ बुद्धिर्विनष्टा ग
लिता प्रवृत्तिर्ब्रह्मात्मनोरेकतयाधिगत्या॥ इदं न जाने प्यनिदं न जाने किं वा कियद्वा
स्य सुखस्य पारं॥ ९४॥ वाचा वक्तुमशक्यमेव मनसा मंतुं न वा स्वाद्यते स्वानंदा
मृतपूरपूरितपरब्रह्मांबुधेर्वैभवं॥ अंभोराशिविशीर्णवार्षिकशिलाभावं भजन्मेम

नोयस्यांशांशलवेविलीनमधुनानंदात्मनानिर्वृतं॥९५॥ क्वगतंकेनवानीतंकु
त्रलीनमिदंजगत्॥अधुनैवमयादृष्टं नास्तिकिंमहदद्भुतं॥९६॥किंहेयंकिमुपादेयं
किमन्यत्किंविलक्षणं॥अखंडानंदपीयूषपूर्णेब्रह्ममहार्णवे॥९७॥नकिंचिदत्रप
श्यामि नशृणोमिनवेद्म्यहं॥ स्वात्मनैवसदानंदरूपेणास्मिविलक्षणः॥९८॥ [illegible]
[illegible] नमोनमस्तेगुरवेमहात्मने विमुक्तसंगायसदुत्तमाय॥नित्याद्वयानं
दरसस्वरूपिणेभूम्नेसदापारदयांबुधाम्ने॥९९॥ यत्कटाक्षशशिसांद्रचंद्रिकापात
धूतभवतापजःश्रमः॥ प्राप्तवानहमखंडवैभवानंदमात्मपदमक्षयंक्षणात्॥१००
धन्योहंकृतकृत्योहंविमुक्तोहंभवग्रहात्॥नित्यानंदस्वरूपोहंपूर्णोहंत्वदनुग्रहा ४०
त्॥१॥असंगोहमसंगोहमलिंगोहमभंगुरः॥प्रशांतोहमनंतोहममलोहंचि

रंतनः ॥ २ ॥ अकर्त्ताहमभोक्ताहमविकारोहमक्रियः ॥ शुद्धबोधस्वरूपोहंकेवलो
हंसदाशिवः ॥ ३ ॥ द्रष्टुःश्रोतुर्वक्तुःकर्त्तुर्भोक्तुर्विभिन्नएवाहं ॥ नित्यनिरंतरनिष्क्रि
यनिःसीमासंगपूर्णबोधात्मा ॥ ४ ॥ नाहमिदंनाहमदोप्युभयोरवभासकंपरंशुद्धं
बाह्याभ्यंतरशून्यंसत्यंब्रह्माद्वितीयमेवाहं ॥ ५ ॥ निरुपममनादितत्वमहमिदम
हइतिकल्पनाइदं ॥ नित्यानंदैकरसंसत्यंब्र० ॥ ६ ॥ नरौपोहंनरकांतकोहंपुरांत य
कोहंपुरुषोहमीशः ॥ अखंडबोधोहमशेषसाक्षीनिरीश्वरोहंनिरहंचानिर्ममः
॥ ७ ॥ चिदेकरूपोहमशेषसाक्षीनिरंतरानंद[illegible]घनोहमक्रियः ॥ सततनोनोहं
पुरुषोहमव्ययः परात्परोहंपरसंगवर्जितः ॥ ८ ॥ असंगरूढस्वछचिदात्मकोहंमाका
शवत्सर्वगतोहमेकः ॥ निरंशकोहंनिखिलात्मकोहंनिरंजनोहंनिरुपाधिरद्वयः ॥ ९

वि॰ सू॰
४१

सर्वेषु भूतेष्वहमेव संस्थितो ज्ञानात्मनांतर्बहिराश्रितः सन्॥ भोक्ता च भोग्यं स्वय
मेव सर्वं यद्यत्स्पृष्टमिदं तथा पुरः॥१०॥ मय्यखंडसुखांभोधौ बहुधा वीचयः॥ उत्प
द्यंते विलीयंते मायामारुतविभ्रमात्॥११॥ स्थूलादिभावा मयि कल्पिता भ्रमादारोपिता
नु स्फुरणेन लोकैः॥ काले यथा कल्पकवत्सरायनर्त्वादयो निष्कलनिर्विकल्पे॥१२॥ आ
रोपितं नाश्रयदूषकं भवेत्कदापि मूढैर्मतिदोषदूषितैः॥ नार्द्रीकरोत्यूषरभूमिभागं म
रीचिकावारि महाप्रवाहः॥१३॥ आकाशवल्लेपविदूरगोहमादित्यवद्भास्यविलक्षणो
हं॥ अहार्यवन्नित्यविनिश्चलोहमंभोधिवत्पारविवर्जितोहं॥१४॥ न मे देहेन संबं
धो मेघेनेव विहायसः॥ अतः कुतो मे तद्धर्मा जाग्रत्स्वप्नसुषुप्तयः॥१५॥ उपाधिरायाति
स एव गच्छति स एव कर्माणि करोति भुंक्ते॥ स एव जीर्यन्म्रियते सदाहं कुलाद्रिवन्निश्चल

विवेक
रो
४१

एवास्मिसंतः॥१६॥ नमेभयंचास्तिर्नचमेनिवृत्तिः सदैकरूपस्यनिरंशकस्य॥ एकात्मको
योनिगूढोनिरंतरो व्योमेवपूर्णः सकथंनुचेष्टते॥१७॥ पुण्यानिपापानिनिरिंद्रियस्य
निश्चेतसोनिर्विकृतेर्निराकृतेः॥ कुतोममाखंडसुखानुभूतेर्ब्रूते ह्यनन्वागतमित्यपि
श्रुतिः॥१८॥ छाययास्पृष्टमुष्णंवाशीतंवासुष्टुदुष्टुवा॥ नस्पृशत्येवयत्किंचित्पुरुषंत
द्विलक्षणं॥१९॥ नसाक्षिणंसाक्ष्यधर्माःसंस्पृशंतिविलक्षणं॥ अविकारमुदासीनंगृह
धर्माःप्रदीपवत्॥२०॥ रवेर्यथाकर्मणिसाक्षिभावोवन्हेर्यथादाहनियामकत्वं॥ रज्जो
र्यथारोपितवस्तुसंगस्तथैवकूटस्थचिदात्मनोमे॥२१॥ कर्त्तापिवाकारयितापिनाहंभोक्तापि
वा पिभोजयितापिनाहं॥ द्रष्टापिवादर्शयितापिनाहंसोहंस्वयंज्योतिरनीदृगात्मा॥२२॥
चलत्युपाधौप्रतिबिंबलौल्यमौपाधिकंमूढधियोनयंति॥ स्वबिंबभूतंरविवद्विनि

ष्क्रियं कर्त्तास्मि भोक्तास्मि हतोस्मि हेति ॥२३॥ जलेपि वा स्थले वापि लुठत्येष जडात्म
कः ॥ नाहं विलिप्ये तद्धर्मैर्घटधर्मैर्नभो यथा ॥२४॥ कर्त्तृत्वभोक्तृत्वखलत्वजडत्वबद्ध सत
त्वविमुक्ततादयः ॥ बुद्धेर्विकल्पा न तु संति वस्तुतः स्वस्मिन्परे ब्रह्मणि केवलेऽद्वये ॥२५॥
संतु विकाराः प्रकृतेर्दशधा शतधा सहस्रधा वापि ॥ तैः किं मे संगाचितेर्न ह्यंबुडंबरमं
बरं स्पृशति ॥२६॥ अव्यक्तादिस्थूलपर्यंतमेतद्विश्वं यत्राभासमात्रं प्रतीतं ॥ व्योमप्र
ख्यं सूक्ष्ममाद्यंतहीनं ब्रह्माद्वैतं यत्तदेवाहमस्मि ॥२७॥ यस्मिन्नस्ताशेषमायाविशे
षं प्रत्यग्रूपं प्रत्ययागम्यमानं ॥ सत्यज्ञानानंदमानंदरूपं ब्रह्मा० ॥२८॥ सर्वाधारं सर्व
वस्तुप्रकाशं सर्वाकारं सर्वगं सर्वशून्यं ॥ नित्यं शुद्धं निश्चलं निर्विकल्पं ब्रह्मा० ॥२९॥ ४२
निष्क्रियोस्म्यविकारोस्मि निष्कलोस्मि निराकृतिः ॥ निर्विकल्पोस्मि नित्योस्मि निरालं

बोस्मि निर्द्वयः॥२०॥सर्वात्मकोहं सर्वोहं सर्वातीतोहमद्वयः॥केवलाखंडबोधोहमा
नंदोहं निरंतरं॥२१॥स्वाराज्यसाम्राज्यविभूतिरेषा भवत्कृपाश्रीमहितप्रसादात्॥प्रा
प्तामया श्रीगुरवे महात्मने नमो नमस्तेस्तु पुनर्नमोस्तु॥२२॥महास्वप्ने मायाकृतज
निजरामृत्युगहने भ्रमंतं क्लिश्यंतं बहुलतरतापैरनुकूलं॥अहंकारव्याघ्रव्यथित
मिममत्यंतकृपया प्रबोध्य प्रस्वापात्परमवितवान्मामसि गुरो॥२३॥नमस्तस्मै सदै
कस्मै कस्मैचिन्महसे नमः॥यदेतद्विश्वरूपेण राजते गुरुराजते॥२४॥इति नतमवलो
क्य शिष्यवर्यं समधिगतात्मसुखं प्रबुद्धतत्वं॥प्रमुदितहृदयः स देशिकेंद्रः पुनरिद
माह वचः परं महात्मा॥२५॥ब्रह्मप्रत्ययसंततिर्जगदतो ब्रह्मैव सत्सर्वतः पश्याध्यात्म
दृशा प्रशांतमनसा सर्वास्ववस्थास्वपि॥रूपादन्यदवेक्षितुं किमभितश्चक्षुष्मतां दृ

दृश्यते तद्ब्रह्मविदः सतः किमपरं बुधैर्विहारास्पदं ॥३६॥ कस्तां परानंदरसानुभूति
मुत्सृज्य शून्येषु रमेत विद्वान् ॥ चंद्रे महाह्लादिनि दीप्यमाने चित्रेंदुमालोकयितुं क इच्छ
ति ॥३७॥ असत्पदार्थानुभवे न किंचिन्नह्यस्ति तृप्तिर्न च दुःखहानिः ॥ तदद्वयानंदर
सानुभूत्या तृप्तः सुखं तिष्ठ सदात्मनिष्ठया ॥३८॥ स्वमेव सर्वतः पश्यन्मन्यमानः स्वम
द्वयं ॥ स्वानंदमनुभुंजानः कालं नय महामते ॥३९॥ अखंडबोधात्मनि निर्विकल्पे विक
ल्पनं व्योम्नि पुरप्रकल्पनं ॥ तदद्वयानंदमयात्मना सदा शांतिं परामेत्य भजस्व मौनं ॥४०
तूष्णीमवस्था परमोपशांतिर्बुद्धेरसत्कल्पविकल्पहेतोः ॥ ब्रह्मात्मना ब्रह्मविदो महात्मनो
यत्राद्वयानंदसुखं निरंतरं ॥४१॥ गच्छंस्तिष्ठन्नुपविशंछयानो वान्यथापि वा ॥ यथेच्छ
या वसेद्विद्वानात्मारामः सदा मुनिः ॥४२॥ नास्ति निर्वासनान्मौनात्परं सुखकृदुत्तमं ॥

विज्ञातात्मस्वरूपस्य स्वानंदरसपायिनः ॥४३॥ न देशकालासनादिग्यमादिलक्ष्या
द्यपेक्षाप्रतिबद्धवृत्तेः ॥ संसिद्धतत्वस्य महात्मनोस्ति स्ववेदने का नियमाद्यवस्था ॥४४
घटोयमिति विज्ञातुं नियमः कोन्वपेक्षते ॥ विना प्रमाणसुष्टुत्वं यस्मिन्सति पदार्थधीः ॥४५
अयमात्मा नित्यसिद्धः प्रमाणे सति भासते ॥ न देशं नापि वा कालं न शुद्धिं चाप्यपेक्षते ॥४६॥
देवदत्तोहमित्येतद्विज्ञानं निरपेक्षकं ॥ तद्वद्ब्रह्मविदोप्यस्य ब्रह्माहमिति वेदनं ॥४७॥
भानुनेव जगत्सर्वं भास्यते यस्य तेजसा ॥ अनात्मकमसत्तुच्छं किं नु तस्यावभासकं ॥४८
वेदशास्त्रपुराणानि भूतानि सकलान्यपि ॥ येनार्थवंति तं किं नु विज्ञातारं प्रकाशयेत् ॥४९
एष स्वयंज्योतिरनंतशक्तिरात्माप्रमेयः सकलानुभूतिः ॥ यमेव विज्ञाय विमुक्तबंधो जयत्य
यं ब्रह्मविदुत्तमोत्तमः ॥५०॥ न खिद्यते नो विषयैः प्रमोदते न सज्यते नापि विरज्यते च ॥

स्वस्मिन्सदाक्रीडतिनंदतिस्वयंनिरंतरानंदरसेनतृप्तः॥५१॥क्षुधांदेहव्यथांत्यक्त्वाबा
लःक्रीडतिवस्तुनि॥तथैववविद्वान्रमतेनिर्ममोनिरहंसुखी॥५२॥चिंताशून्यमदैन्यभै
क्ष्यमशनंपानंसरिद्वारिषु॥स्वातंत्र्येणनिरंकुशास्थितिरभीर्निद्राश्मशानेवने॥व
स्त्रंक्षालनशोषणादिरहितंदिग्वास्तुसर्वामहीसंचारोनिगमांतवीथिषुविदांक्रीडा
परेब्रह्मणि॥५३॥भुंक्तेयथेष्टंनगरेषुभैक्ष्यंसरित्सरस्स्वंबुपिबत्यभीष्टं॥शेतेगुहायो
त्मणि रमतेसदात्मन्यकिंचनो[illegible]यःसमुक्तः॥५४॥अभक्ष्यचिंतांवसनस्यचिंतांशरीर
चिंतांचतदन्यचिंतां॥विस्मृत्यबाह्यंसततंपरात्मन्यकिंचनस्तिष्ठतियःसमुक्तः॥५५॥
विमानमालंब्यशरीरमेतद्भुनक्त्यशेषान्विषयानुपस्थितान्॥परेच्छयाबालवदात्मवेत्ता
योऽव्यक्तलिंगोननुषक्तबाह्यः॥५६॥दिगंबरोवापिचसांबरोवात्वगंबरोवापिचिदंबर ४४

द्वा
रछः॥ उन्मत्तवत्पिच बालवद्वापि पिशाचवद्वो वेपि चरत्यवन्यां॥५७॥ कामान्नी काम
रूपी संश्चरत्येकचरो मुनिः॥ स्वात्मनैव सदा तुष्टः स्वयं सर्वात्मना स्थितः॥५८॥ क्वचि
न्मूढो विद्वान्क्वचिदपि महाराजविभवः क्वचिद्भ्रांतः सौम्यः क्वचिदजगरा[illegible]रैश्चोकलि
तः॥ क्वचित्पात्रीभूतः क्वचिदवमतः क्वाप्यविदितश्चरत्येवं प्राज्ञः सततपरमानंदसु
खितः॥५९॥ निर्धनोपि सदा तुष्टोप्यसहायो महाबलः॥ नित्यतृप्तोप्यभुंजानोप्यसमो
समदर्शनः॥६०॥ अपि कुर्वन्नकुर्वाणश्चाभोक्ता फलभोग्यपि॥ शरीर्यप्यशरीर्येषप
रिछिन्नोपि सर्वगः॥६१॥ अशरीरं सदा संतमिमं ब्रह्मविदं क्वचित्॥ प्रियाप्रियेन स्पृ
शतस्तथैव च शुभाशुभे॥६२॥ स्थूलादि संबंधवतोभिमानिनः सुखं च दुःखं च शुभा
शुभे च॥ विध्वस्तबंधस्य सदात्मनो मुनेः कुतः शुभं वाप्यशुभं फलं वा॥६३॥ तमसा ग्रस्त

अज्ञानाद्ग्रस्तोपि रविर्जनैः॥ अस्त इत्युच्यते भ्रांत्या ह्यज्ञात्वा वस्तुलक्षणं॥ ६४॥ त
द्देहादिबंधेभ्यो विमुक्तं ब्रह्मवित्तमं॥ पश्यंति देहिवन्मूढाः शरीराभासदर्शनात्॥ ६५
अहिनिर्ल्वयिनीवायं मुक्तदेहस्तु तिष्ठति॥ इतस्ततश्चाल्यमानो यत्किंचित्प्राणवायुना॥ ६६
स्रोतसा नीयते दारु यथा निम्नोन्नतस्थलं॥ दैवेन नीयते देहो यथाकालोपभुक्तिषु॥ ६७॥
प्रारब्धकर्मपरिकल्पितवासनाभिः संसारिवच्चरति भुक्तिषु देहः मुक्तः॥ सिद्धः स्वयं वसति
साक्षिवदत्र तूष्णीं चक्रस्य मूलमिव कल्पविकल्पशून्यः॥ ६८॥ नैवेंद्रियाणि विषयेषु नियुं
क्त एष नैवापयुक्त उपदर्शनलक्षणस्थः॥ नैव क्रियाफलमपीषदवेक्षते सः स्वानंदसांद्र
रसपानसुमत्तचित्तः॥ ६९॥ यस्यालक्ष्यगतिं त्यक्त्वा यस्तिष्ठेत्केवलात्मना॥ शिव एव स्वयं
साक्षादयं ब्रह्मविदुत्तमः॥ ७०॥ जीवन्नेव सदा मुक्तः कृतार्थो ब्रह्मवित्तमः॥ उपाधिनाशाद्

कृत्स्नैवसन्ब्रह्माप्येतिनिर्द्वयं॥७१॥शोकहर्षौवेषसद्भावाभावयोश्चयथापुमान्॥तथै
वब्रह्मविच्छेषःसदाब्रह्मैवनापरः॥७२॥यत्रक्वापिविशीर्णंसत्पर्णमिवतरोर्वपुःपत
नात्॥ब्रह्मीभूतस्ययतेःप्रागेवहितच्चिदग्निनादग्धं॥७३॥सदात्मनिब्रह्मणितिष्ठतो
मुनेःपूर्णाद्वयानंदमयात्मनासदा॥नदेशकालाद्युचितप्रतीक्षात्वङ्मांसविट्पिंडविस
र्जनाय॥७४॥देहस्यमोक्षोनोमोक्षोनदंडस्यकमंडलोः॥अविद्याहृदयग्रंथिमोक्षो
मोक्षोयतस्ततः॥७५॥कुल्यायामथनद्यांवाशिवक्षेत्रेपिचत्वरे॥पर्णंपततिचेत्ते
नतरोःकिंनुशुभाशुभं॥७६॥पत्रस्यपुष्पस्यफलस्यनाशवद्देहेंद्रियप्राणधियां
विनाशः॥नैवात्मनःस्वस्यसदात्मकस्यानंदाकृतेर्वृक्षवदस्तिचैषः॥७७॥प्रज्ञा
नघनइत्यात्मलक्षणंसत्यसूचकं॥अनूद्यौपाधिकस्यैवकथयंतिविनाशनं॥७८॥

वि॰चू॰
४६

अविनाशीवाअरेयमात्मेतिश्रुतिरात्मनः॥ प्रब्रवीत्यविनाशित्वंविनश्यत्सुविकारिषु॥
॥७९॥पाषाणवृक्षतृणधान्यकटांबराद्यादग्धाभवंतिहिमृदेवयथातथैव॥ देहेंद्रिया
सुमनआदिसमस्तदृश्यंज्ञानाग्निदग्धमुपयातिपरात्मभावं॥८०॥विलक्षणंयथा
ध्वांतंलीयतेभानुतेजसि॥ तथैवसकलंदृश्यंब्रह्मणिविप्रलीयते॥८१॥ घटेनष्टे
यथाव्योमव्योमैवभवतिस्वयं॥ तथैवोपाधिविलयेब्रह्मैवब्रह्मवित्स्वयं॥८२॥ए
वंविदेहकैवल्यंसन्मात्रत्वमखंडितं॥ ब्रह्मभावंप्रपद्यैषयतिर्नावर्ततेपुनः॥८३॥स
दात्मैकत्वविज्ञानदग्धाविद्यादिवर्ष्मणः॥ अमुष्यब्रह्मभूतत्वाद्ब्रह्मणःकुतउद्भवः॥८४
मायाक्लृप्तौबंधमोक्षौनस्तःस्वात्मनिवस्तुतः॥ यथारज्जौनिष्क्रियायांसर्पाभासवि ४६
निर्गमौ॥८५॥आवृत्तेःसदसत्त्वाभ्यांवक्तव्येबंधमोक्षणे॥ नावृतिर्ब्रह्मणःका

चिदन्याभावाद्दनावृतं ॥८६॥ यद्यस्याद्वैतहानिः स्याद्द्वैतं नो सहते श्रुतिः ॥८७
बंधश्च मोक्षश्च मृषैव मूढा बुद्धेर्गुणं वस्तुनि कल्पयंति॥ दृगावृतिं मेघकृतां रवौ य
थायतोद्वयासंगचिदेतदक्षरं ॥८८॥ अस्तीतिप्रत्ययो य[illegible]श्च यश्च नास्तीति व
स्तुनि ॥ बुद्धेरेव गुणावेतौ न तु नित्यस्य वस्तुनः ॥८९॥ अतस्तौ मायया क्लृप्तौ बं
धमोक्षौ न चात्मनि ॥ निष्कले निष्क्रिये शांते निरवद्ये निरंजने ॥९०॥ अद्विती
ये परे तत्वे व्योमवत्कल्पना कुतः ॥९१॥ न निरोधो न चोत्पत्तिर्न बद्धो न च साध
कः ॥ [illegible] न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥९२॥ सकल
निगमचूडास्वांतसिद्धांतगुह्यं परमिदमिति गुह्यं दर्शितं ते मया द्य ॥ अप

वि॰ चू॰
४७

सः

गतकलिदोषं कामनिर्मुक्तबुध्धिंतमनुवदसकृत्त्वं भावयित्वामुमुक्षुः ॥९३॥ इ
तिश्रुत्वागुरोर्वाक्यं प्रश्रयेण कृतानतिः ॥ सतेनसमनुज्ञातो ययौनिर्मुक्तबंधनः
॥९४॥ गुरुरेषसदानंदसिंधौनिर्मग्नमानसें ॥ पावयेवसुधांसर्वांविचचारानि
रंतरः ॥९५॥ इत्याचार्यस्याशिष्यस्य संवादेनात्मलक्षणं ॥ निरूपितंमुमुक्षूणां
सुखबोधोपपत्तैपेये ॥ ९६॥ हितमुदमुपदेशमाद्रियंतांविहितानिरस्तसमस्त
चित्तदोषः ॥ भवसुखविरताः प्रशांतचित्ताः श्रुतिरासिका यतयोमुमुक्षवो
ये ॥९७॥ संसाराध्वानितापभानुकिरणप्रोद्भूतदाहव्यथाखिन्नानांजलकां
क्षयामरुभुविभ्रांत्यापरिभ्राम्यतां ॥ अत्यासन्नसुधांबुधिं सुखकरं ब्रह्मा ४७

वि॰ चू॰
४८

क्षयं दर्शयत्येषा शंकरभारती विजयते निर्वाणसंदायिनी ॥५९८॥ इतिश्री
मत्परमहंसपरिव्राजकाचार्य श्रीमद्गोविंदभगवत्पादशिष्यश्रीमछंकरभगवत्
पादकृतो विवेकचूडामणिः समाप्तः ॥ ॥श्रीमत्सीतारामचंद्रार्पणमस्तु ॥
शाके भूसिद्धिमुनिक्ष्मिते १७८१ दक्षिणायने नभस्यासिते षष्ठ्यां सोमे मित्रवास
रे ब्रह्मसंक्षेत्रे दंपुरस्थगुरुचरणांभोजमिलिंदेन श्रीसखारामसूनुना माधवेन
मार्दस्केनेदं पुस्तकं लिखितं ॥ ॥शुभं भवतु ॥ ॥श्रीरस्तु ॥१९९

॥ इति विवेकचूडामणिः समाप्तः ॥

[OrderDescription]
,CREATED=18.01.20 11:14
,TRANSFERRED=2020/01/18 at 11:24:43
,PAGES=97
,TYPE=STD
,NAME=S0002554
,Book Name=M-417-VIVEKCHUDAMANI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF

FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF

FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF

FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF

FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF

FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF

FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF

FILE97=00000097.TIF
,